वैयाकरण

[illegible] भूषणसार ~~टीका~~ व्याख्या

दर्पणाख्याभिधा

४७ पत्राणि

१६८

१६८

ओम् ॥ श्रीगणेशाय नमः ॥ रमाप्रेमामत्रं जगदवनदक्षं मधुहृतं तक्रतीनामादानाद्द्विजनितवेदाननमुदम् । अखण्डानन्दाढ्यं निखिलजनहृत्पङ्कजनिलयं स्वग्रीवं वन्दे प्रकृतकृतिविघ्नशमिकृते ॥ १ ॥ सत्येकस्मिन्नविबाधके साधकसहस्र-
दपि कार्यो न तेरदर्शनादपेक्षितप्रारिप्सितप्रत्यूहापोहाय तद्धितं भगवत्स्तुतिरूपं मङ्गलं शिष्यशिक्षार्थमादौ निबध्नाति । श्रीलक्ष्मीरमणमित्यादि । रमतेऽस्मिन्नरमेत्याधिकरणे ल्युडन्तो रमणशब्दस्तेन कर्तृषष्ठ्यन्तलक्ष्मीपदस्य समासः यद्वा रम-
लघ्यादो नन्द्यादिः रमयतीति रमण इति सुत्यन्तेन कर्मषष्ठ्यन्तलक्ष्मीपदस्य समासः ततः श्रीसहितो लक्ष्मीरमणस्तं तत्र रपदलोपी समासः शाकपार्थिवादित्वात् गणत्वात् तेन सप्राकृतिकस्येव भगवतो जगन्निर्माणकारणत्वमिति तस्य चित्तं श्रीम-
हितेन सर्व कं अतिविशेषणम् नौमीति ण्डस्तुतावित्यतो नेरस्य सूर्द्धप्रयोगेपि तदर्थस्य गम्यमानत्वात् स्तुमः मधुरुपः अस्मद्गुणमहत्त्वस्य अनिन्दनीयत्वत् उक्तः स्तुतिश्चोत्कृष्टगुणवत्तया वर्णनम् तथा चोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो व्या-
पारो नुधात्वर्थः बोधरूपफलाश्रयत्वात् लक्ष्मीरमणस्य कर्मता एवं च वैयाकरणमते श्रीलक्ष्मीरमणाश्रयकोत्कृष्टगुणवत्त्वप्रकारकबोधानुकूलो मदभिन्नैकाश्रयको वर्तमानः शाब्दप्रयोगरूपो व्यापार इति वाक्यार्थः न त्वेतच्छास्त्रप्रवर्तकत्वेनाभ्य-
र्हिततमत्वात्शिवस्तुत्यात्मकमेव मङ्गलं किमिति न कृतमत आह गौरीरमणरूपिणमिति । आकारपरेणरूपपदेन गौरीरमणपदस्य समासस्ततो दन्त्वनिबन्धनो मत्वर्थीयइनिः तथा च तदभिन्नमित्यर्थः प्रमाणं चात्र योगेवैविक्तिः सर्वे रुद्रई इत्यादिश्रुत-

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् । स्फोटरूपं यतः सर्वं जगदेतद्विवर्तते ॥ १ ॥ अशेषफलदातारं भवाब्धितरणे तरिम् । शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥ पाणिन्यादिमुनीन् प्रणम्य पितरं स्फोजिभट्टाभिधं हैतद्धान्तविवा-
रणादिकलिकां भावं वाग्देवताम् । दुष्टिं गौतमजैमिनीयवचनव्याख्यातैर्मिहृष्टिना सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचोदूषये ॥ ३ ॥ प्रारिप्सितप्रतिबन्धकोपशमनाय कृतेश्वरी कलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नं श्रीकीर्तितं प्रतिजानीते ।
लम् तेन कार्यवैचित्र्यस्य कारणवैचित्र्यनियम्यत्वाज्जगदवनादिकार्यवैचित्र्योपपत्तये तन्तत्कुणरूपिपरिग्रहो न तु वस्तुतस्तयोर्भेद इति प्रकृतस्तुतिकर्मत्वं तस्यापीति नोक्तदोष इति ध्वनितम् गुणोत्कर्षमेवाह यत इति मायाशबलस्वप्रकाशब्रह्मणो जगदुपादानत्व-
स्यवेदान्तमतसिद्धत्वाज्जनिकर्तुरिति पञ्चमी प्रकृतिशब्दस्य निमित्तपरत्वाद्वा यस्माद्धेतोरित्यर्थः स्फोटरूपं सर्वं जगद्विवर्ततइतियोजना । स्फोटेति । स्फुटत्यस्मिन्नर्थ इति मवत्यर्थो स्मादिति स्फोटः शब्दः स एव रूपं निरूपकं इति स्वप्रमर्थश्रयोः सयाहारः स्फोटरूपं वा
यद्वा वाचकस्वरूपमित्यावत् नामरूपे व्याकरवाणीति श्रुतेः तद्विशेषणं जगदिति वर्तमाने पच्यते इति निपातनात्साधुः (यद्वा यत इति विवर्तस्योपादानादित्यर्थः) गच्छतीति तिरोभवतीति कुत्सितानाम्प्रतियोगीत्यर्थः तेन सत्कार्यवादस्यासादत्तमत्वसूचयति
यत्किंचिन्नामरूपस्यापि नोपि संभवादाह सर्वमिति । यावदित्यर्थः कम् विवर्तते समुत्पद्यते इत्यर्थः अत्रचयतो या इमानि भूतानि जायन्ते इत्यादि श्रुत्यन्तयः प्रमाणम् अत्र विरूपलक्षणमवनादेः तेन जगत्कर्तृत्वादेः स्तुत्यत्वं वेदे केवलत्वम् । यद्वा यत इति वि-
वर्तोपादानादित्यर्थः सप्तम्यन्तात्सार्वविभक्तिकस्तसिना यस्मिन्नधिष्ठाने इत्यर्थः विवर्तते भूतमात्रेन्द्रियात्मना प्रतिभातीत्यर्थः नेह नानेत्यादिश्रुत्या बोधितबाधस्यापि जगतः स्वप्ने शुक्तिरजतस्येवाभासनोपपत्तेर्मनोविषयान्तरसमन्वयात्प्रपञ्चनियामकत्वात् अत्रैव
स्फोटरूपं तत्त्वमात्मसु त्वत्तेः सममस्तार्थप्रकाशकं वेदान्तिमते नास्तिकान्यथाभावस्यैव विवर्तनात्प्रयुक्तस्वरूपस्यैव ब्रह्मणो जगद्रूपेण विवर्तनादिति सर्वोत्कृष्टत्वं गतिरिति भावः अत्र भगवद्विषयकरतिभावस्य हेत्वलंकारोऽनुष्टुम् ॥ १ ॥ जगदुपा-
दानत्वेन स्तुत्वा निःश्रेयससाधनज्ञानविषयत्वेनैतद्व्याख्यातृशेषभूषणत्वेन तच्छेषप्रतिपादितसमस्तसिद्धान्तप्रतिपत्तये स्तौति अशेषेति फलेष्वर्थसंदेहपदस्वर्गादि यत्किंचित्फलदातृत्वं तस्यान्यदेवतास्वपि संभवादाह अशेषेति । तथा चापवर्गरूपफलस्या-
प्यशेषपदेन संग्रहान्नहि तस्यानन्यसाधारण्यस्य लाभो नापूर्वतावच्छेदकधर्मो वर्णितस्तदेवाह । भवाब्धीति भवपदाब्धिरिति रूपकम् अज्ञीयग्राहादि सदृशत्वात् कामक्रोधादिता भक्ता तत्त्वाद्देवतारोपः तेन च तत्स्वदुस्तरत्वं व्यज्यते तत्सन्तरणमीप्सितं प्राणदे शाप्राप्नित्यासिद्धि-
रित्यर्थः तरिम् साधनम् यद्यपि तरिपदार्थस्तरणे साधनं स्त्रियां नौस्तरणिसरिरितिकोशात्तत्त्वं न यत्तु यत्तिविशुद्धचित्तत्वाद्यपि विशेषणस्य तरणस्य सन्निहितपदे नैवलाभादिदोषाभावपरत्वं चूडामणि मुक्तिसाधनज्ञानविषयमिति यावत् तमेव विदित्वेति श्रुतेः मुक्ति-
श्चेदानिमतत्स्वरूपप्राप्तिः तत्र ज्ञानेनावरणास्तानत्तिवृत्तौ स्वरूपेणावस्थानमिति तदर्थः नव ज्ञाननिवृत्तौ धिकरणानतिरिक्तायाः स्वरूपस्याविवसिद्धत्वात्स्वरूपायास्तस्याः स्वत्वं ज्ञानसाध्यता कुप्यतिरितिचेन्न परेषां प्रागभावस्येव सिद्धायाः एवाज्ञाननिवृत्ते-
र्योगक्षेमसाधारणाः साध्यतायाः संभवात् अधिकमन्यतोऽवधेयम् । नैयायिकास्त्वात्यन्तिकदुःखध्वंसो मुक्तिः ध्वंसे आत्यन्तिकत्वं च समानाधिकरणदुःखप्रागभावासमानकालिकत्वम् अत्रैव च तत्त्वज्ञानस्योपयोगः विशेषणात्र सम्पत्तस्य अपवर्गसंग-
वाक्यनिरस्तवोसियन्तिर्वा सेत्याहुः । अशेषाशेषेति कर्मधारयोत्तरपदः षष्ठीतत्पुरुषः तस्य च लाभपदेन समासो लाभाय इदमिति विग्रहे च तर्थ्ये प्रार्थ्यपदेन समासः शेषः पतञ्जलिः अशेषशब्दपातञ्जलस्य तथा चाशेषोक्तभाष्यप्रतिपादितादित्यसिद्धान्तज्ञानायेत्यर्थः ।
शेषभूषणमिति शेषोऽनन्तः स भूषणं यस्येत्यर्थः यतो सम्भूषणशेषोऽतो स्तुशेषोक्तसिद्धान्तलाभोऽप्रार्थनमिति सा मित्राय विशेषसोपादानात्परिकरालंकारो भगवद्विषयकरत्यङ्गम् ॥ २ ॥ प्रेत्तावत्तरत्नप्रेरकं तस्याभ्यासः स अन्यस्योत्कर्षप्रदर्शयन्नेव
दर्शनीयविषयसंबन्धप्रयोजनाधिकारिणामध्येव प्रदर्शनीयविषयं दर्शयति । पाणिन्यादीति । वृंभावमाग्देवतामिति पितृविशेषणम् अत्रश्रोपात्तद्धिविशेषणं वा वृंसौ भावो यस्या इति व्यधिकरणबहुव्रीहिः पदकः कर्मधारयो वाग्देवतापदेन अथवा
वृंभावस्य द्वेषशब्दात्प्रत्ययः तथा चाविकृतवृंविग्रहां सरस्वतीमित्यर्थः तद्दिष्टे वर्णं द्वैतध्वान्तादि । द्वाभ्यां प्रकाराभ्यामितो ज्ञातो द्वीतो विरुद्धो भयधर्मप्रकारक ज्ञानविषयो धर्मीति यावत् यदादयो भावो द्विता स्वनिषेकविशेषतानिरूपितोभयप्रकार
तासंबन्धेनविरुद्धानाधर्मा यो धर्मिणो भावत्वसंभवाद्धिता पदार्थो पि धर्मैव तत्र भवं द्वैतं संशयात्मकं ज्ञानम् अथवा द्वयोः सदसतोर्भावो द्विता नानात्वं तत्संबन्धि द्वैतं परमार्थदशायामद्वितीयेपि ब्रह्मणि नेह नानास्तीतिश्रुत्याबाधितनानात्वावगाहनं कारण १

तथाच सर्वज्ञ
कार्यज्ञानं:

हृत्विशेषस्वरूपमविद्यापरपर्यायं मिथ्याज्ञानं तद्ध्वंसे तमस्तत्त्वाशक्याशक्यत्वात् त्रिवारणादिर्मुख्यं फलं यस्मात्स्मादित्यर्थः स्वोपासकस्य तद्विरोधि सन्मात्रावलम्बन निस्प्रपञ्चात्मकज्ञानप्रदत्वात् स्यास्तत्त्वविवेचकत्वमिति भावः दुर्गितं गणपतिम्
इदमपि प्रणामक्रियायां कर्मतयान्वयि सिद्धान्तानिति भाष्यकारादिग्रन्थकृन्निर्णीतार्थाः सिद्धान्तास्तानित्यर्थः उपपत्तिभिः साधकप्रमाणोपन्यासरूपयुक्तिभिरित्यर्थः दूषये उपपत्तिभिरेव बाधकप्रमाणोपन्यासरूपाभिरित्यर्थः एतेनान्यग्र
न्थेभ्यः स्वग्रन्थस्योत्कृष्टत्वं ध्वनितम् तथा च वैयाकरणसिद्धान्तोऽत्र विषयः प्रदर्शितः (एतेनान्यग्रन्थेभ्यः स्वग्रन्थस्योत्कृष्टत्वं ध्वनितम् तथा च वैयाकरणसिद्धान्तोऽत्र विषयः प्रदर्शितः) तेनैव तज्ज्ञानं प्रयोजनं प्रतिपाद्यप्रतिपादकभावः संबन्धः सिद्धान्त
जिज्ञासुरधिकारीति त्रयोऽप्यर्थात्प्रदर्शिता इत्याशय इति भावः ।२। ग्रन्थादावनुष्ठितस्य मङ्गलस्य तन्निबन्धनस्य च फलं दर्शयति । प्रारिप्सितेत्यादिना । समाप्तावयत्नेति विहाय प्रतिबन्धकोपशमनायेत्युक्त्या ॰ विगीतशिष्टाचारानुमितफलमङ्गलस्य विघ्नध्वंसप
वफलजन्मान्तरीयसमाप्तिप्रदृष्टशिष्टानां मङ्गलाननुष्ठानान्मङ्गलसमाप्तोः प्राचीरनिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्य कल्पनीयतया तस्य च नास्तिकसमाप्तौ व्यभिचारेण समाप्तेस्तत्त्वासंभवात् किं तु कार्यमात्रं प्रतिप्रतिबन्धकाभावस्य हेतुतया दुरि
तस्य प्रतिबन्धकनिरासपरं मङ्गलस्योपयोगेन तु समाप्ताविति विघ्नध्वंसेनान्यथासिद्धतात्र समाप्तित्वन्यत्रत्यो मुख्यकारणकलापादिति सर्वेषम् । फलतीति । शेषाख्यं धाममात्मकमिति भगवदङ्कैस्तत्स्मरणस्यापि विघ्ननिवारकत्वात् मङ्गलस्य तति
स्तुत्यादिभेदेन नानात्वस्त्वचनायाह स्मरणरूपमिति प्रतिजानीत इति । प्रतिजानीत इति । प्रतिज्ञाफलं तु शिष्यावधानमिति बोध्यम् उद्धरणकर्त्रीकाह्तायामाह । प्रस्तावमिरिति । कथ्यत इति हर्यादिभिर्वृद्धकारिकाभिरेतिशेषः । तत्र स्फोटे शब्दार्थबोधजनक
त्वातेनैव वार्थसमाप्ते स्य वाक्यस्फोटस्य वाक्यस्फोटो तिनिष्कर्ष इत्यादिना सिद्धान्तयिष्यमाणत्वेऽपि प्रतिवाक्यं संकेतग्रहासंभवाद्दन्वाख्यानस्य लाघवायेनान्वकरताच्चेतत्वकल्पनया पदानि विभज्य पदेष्वपि प्रकृतिप्रत्ययभागांस्तावेव विभज्य कल्पिताभ्यामन्व
यव्यतिरेकाभ्यां तत्तदर्थशुभप्रकृतिप्रत्ययानामनादिसंकेतबोधनद्वारा साधुत्वान्वाख्यापके (सिम्मद्दर्शिप्रणीतेशास्त्रप्रक्रियानिर्वाहाय पदवर्णस्फोटावपि संमताविति दर्शयत्सिङन्तार्थप्रधानेत्सतिङन्तचयरूपेवाकोधात्वर्थस्य प्राधान्यात्क्रमेवादौ निरूपयितुमा
ह । फलव्यापारयोरिति । धातुरित्यस्य तस्तत्राङ्इति विशेषणवाचकपदं विभिन्नवचनत्वात् विशेष्यवाचकपदान्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्यायामविवक्षायां विशेष्यविशेषणवाचकपदयोः समानवचनत्वनियमात् अन्यथा हरेनीला

फलेति भाषितं भाष्याद्येः शाब्दबोधस्तु भवद्भिः तत्त्वनिर्णीतपदार्थः संक्षेपेणेह कथ्यते १ उद्धृतस्य सन्नासमिरिति शेषः भाष्याद्येः शाब्दबोधस्तु भवदुक्तिस्तु प्राकृतबोधस्तु भोक्तानामर्थानामाधुनिकोद्भेदितत्वनिरासार्थम् अन्यथानम्मलकस्या
स्वग्रन्थस्याधुनिकोद्भेदितत्वसारोपानौपादेयतापत्तेः तत्त्वनिर्णीतरमुक्तिस्तिनोपद्यधिकजिज्ञासुभिः शाब्दबोधस्तु भवद्भवमितिध्वनयितुं प्रतिज्ञातमाह । फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः फले प्रधानं
व्यापारस्तिङर्थस्तु विशेषणम् २। धातुरित्यत्रास्मदाङ्इति वचनविपरिणामेनान्वयः फलं विक्लित्यादि ॥

इत्यादेरपि साधुताप्रसंगात्तद्विवक्षायां तु वेदाः प्रमाणं गुरवो माक्ष्वसो विश्वेदेवा इत्यादौ विभिन्नवचनत्वमपि नच प्रकृते तद्विवक्षायां निदानोपलब्धिरतो वचनविपरिणामेनान्वयं दर्शयति भूषणसारे । धातुरित्यत्रेति । स्वतन्त्रस्य वा
चकत्वेनेत्यादिः ननु यदुद्देशेन प्रवृत्तिर्लोके कृतो वा प्रवृत्तिरखण्डमर्यते तत्फलत्वम् तदुक्तं हरिणा यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यन्ते पचादयः तत्प्रधानं फलं तेषां न लाभादि प्रयोजनमिति स्वरितञितः कर्त्रभिप्राये क्रियाफले इति सूत्रेऽपि फलपदं प्रयुञ्जानस्य महर्षेरप्य
यमर्थः संमतः तथा च तादृशफलस्य धात्वर्थत्वे विक्लित्यनुकूलव्यापारदशायां तण्डुलस्य तादृशधात्वर्थफलाश्रयत्वाभावात्कर्मत्वानुपपत्तिरित्याशङ्क्याह । फलं विक्लित्यादीति ॥ अयमाशयः लोके यद्यपि फलपदमुद्देश्यतादृशोद्देश्यस्याप
कत्वेऽपत्रपारिभाषिकार्थपरत्वमेव तत्स्वेतिन पूर्वोक्तानुपपत्तिरिति । तत्त्वं च यथा धात्वर्थजन्यत्वे सति धात्वर्जन्योपस्थितिविषयत्वम् । जन्यत्वं च क्वचिद्धात्वंशे क्वचिद्वारोपितमेव गम्यर्थव्यापारजन्यविभागे तिव्याप्तिवारणाय विशेष्यम् तदर्थव्या
पारे तिप्रसंगवारणाय सत्यन्तम् तत्र विक्लित्यादीनामसत्त्वम् तस्यापि शृणुत्वात्तत्तद्रूपेणैव तत्तद्रूपेणैव फलबोधस्य सर्वानुभवसिद्धत्वाद्धात्वाद्यज्ञानतोऽपितद्दोषाच्चेति भावः । परेत । कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थजन्यत्वे सति तद्धात्व
र्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वं फलत्वम् । जन्यतावच्छेदितानाशेदितावेयम्न्यदेतत् विभागजन्यसंयोगादिरूपे पतत्यादार्थे विभागसंयोगयोः फलत्ववारणाय भयम् कर्मत्वाख्याने फलस्य विशेषतये वभानात्तत्रातिप्रसंगवारणाय क
र्तृप्रत्ययसमभिव्याहार इति । तत्र । अननुगतफलत्वानिरुक्तेः विभागजन्यसंयोगस्य पतत्यर्थत्वाभावेनाव्याप्त्यप्रसिद्धेश्चेत्यधिकमग्रे व्यक्तं ॥ ननु व्यापारत्वं न फलप्रयोजकक्रियात्वं मात्मा प्रयात् क्रियात्वस्यैव हितत्वात् दण्डादिव्यापारस्या
पि धात्वर्थत्वापत्तेश्च नचेष्टापत्तिः धात्वर्थव्यापाराश्रयस्यैव कर्तृत्वेन दण्डादेः कर्तृत्वापत्ते नाभिधानाद्दण्डेन देवदत्तः पचतीत्यादौ दण्डादिपदोत्तरं प्रथमापत्तिः कर्तृकरणसंज्ञयोराकडारीयतया संज्ञाद्वयसमावेशासंभवेनाभिमतकरणसंज्ञा
याः परया कर्तृसंज्ञया बाधात् किंच प्रयोजकत्वं यदि साक्षाज्जनकत्वं तदा कर्तृव्यापारस्य पचतीत्यादौ धात्वर्थत्वानापत्तिः तस्य करणादिव्यापारद्वारैव फलजनकत्वात् यदि जनकजनकत्वं तदा तण्डुलक्रयणस्यापि फलप्रयोजकक्रियात्वात्तद
शायामपि पचतीति प्रयोगापत्तेः आत्मादीनां ज्ञानत्वादिकर्तृत्वानापत्तेश्च तदर्थव्यापारस्यात्ममनःसंयोगादेस्तीनरूपफलं प्रतिसाक्षाज्जनकतया धात्वर्थत्वासंभवात् उभयव्यापारत्वप्रयोजकत्वस्य तण्डुलक्रयणादिव्याहृत्तस्य निर्वक्तुमशक्यत्वाच्च अ
तएव तज्जन्यत्वे सति तज्जन्यजनकत्वरूपं तत्त्वं तत्पदार्थेरिति दतने तदवच्छिन्नस्य धात्वर्थवाच्यत्वे विक्लित्यवच्छिन्नेतरार्थेह त्वितजनकाग्निमाग्निसंयोगदशायामेव पचतीति प्रयोगः स्यान्न त्वधिश्रयणादिदशायामपि तस्याग्निमाग्निसंयोगेनान्यथासिद्धतया विक्लित्य

लक्षण
तत्त्वात्तूनलतेन=

धात्वः=

विभागफलत्ववारणा
यरूप्य ... संयोग
तद्धात्वर्थसाधारणलक्षणम्=

कुलालपुत्रादेर्व्यापारं तु वारणाय
इव्यापत्वे सति तीम पिवोध्यम्—

न्याय=

व्यापारत्वं

विक्लित्तिः=

भू.सा.द.
२
४

जनकत्वादित्यत आह । व्यापारस्त्विति । साध्यत्वेनेत्युपलक्षणमेतत्तीया । तथा च पदान्तरसमभिव्याहाराप्रयोज्यसाध्यत्वप्रकारकप्रतीतिविषयत्वं व्यापारत्वमित्यर्थः । तदंकरोतीत्यादौ कृञादिसमभिव्याहारे त्वादीनामपि साध्यत्वेन प्रतीतेरतिप्रसंगभङ्गाय पदान्तरसमभिव्याहाराप्रयोज्येति प्रतीतिविशेषणम् । अधिश्रयणाद्यधःश्रयणपर्यन्तक्रियाकलापस्य पदान्तरसमभिव्याहारमन्तरेण विधातोः साध्यत्वेन प्रतीयमानत्वादुक्तव्यापारत्वमविकलमिति दिवृक्षित्वे पञ्चादिधातुवाच्यत्वेति भावः । उक्तार्थस्पष्टीकरणे दिनत्वेनिरस्यति । उक्तं चेति । यावदिति सर्वमित्यर्थः । तदेवाह । सिद्धमित्यादिना । सिद्धं विद्यमानं घटस्य प्रतियोगि अपातो दिन्यादौ असिद्धं तद्भिन्नं वर्तमानतोरंशे प्रागभावप्रतियोग्यन्यतरत् पचतिपदस्य तीत्यादौ यद्वा सिद्धता सिद्धत्वे अप्रत्ययविशेषते अत एव तदुद्भूतत्वसमर्पकयावदिति विशेषणसार्थक्यम् साध्यत्वेनेत्यादि क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मरूपसाध्यत्वप्रकारकप्रतीतिविषयो भवतीत्यर्थः क्वचिद्विवक्षितेरतिभावः । यद्वा साध्यत्वं निष्पाद्यत्वमेव तत्प्रकारके त्यादिरूपेण । एतेन क्रियाशब्दस्य रूढत्वप्रदर्शितं योगिकत्वमपि तत्साह । आश्रित्येति । आश्रितक्रमरूपं यस्मात्तच्चारणवी परीभूतावयवत्वादित्यर्थः तदीयावयवानामधिश्रयणाद्यधःश्रयणपर्यन्तानां क्रमेणोत्पत्तेः । क्रियापदस्य व्यवहार्यापिसा फलस्यापिस्वजनकव्यापारगतपौर्वापर्यत्वात् तथैव भानमत एव तन्मात्रवाचकस्य धातुत्वसिद्धिरिति भावः । पाक इति । यद्यपि साध्यत्वेनोपस्थितिरथ्यत्रान्तर एव स्तोकं पाक इत्यादौ स्तोकादीनां कर्मत्वं तथापि तत्परस्याप्यस्यैव सिद्धत्वे वेत्याशये न तयोः क्रमत्वात् दोषः पर्यवसितार्थमाह । तथा चेति । क्रियान्तरेति । अयं भावः पाकादिपदेन तद्धर्मवत्त्वे ज्ञाते क्रियान्तराकाङ्क्षोदया सिद्धत्वज्ञानस्य क्रियान्तरविषयकाकाङ्क्षाप्रतिकारणत्वकल्पनीयं तथा च तादृशज्ञाने प्रकारितयावच्छेदकरूपं सिद्धत्वं तदभाववत्त्वे ज्ञानत्वे

सार्वभौमस्तत्तद्वत्त्वम्

एतादृशकाङ्क्षोत्थापकताभावावच्छेदकवत्त्वं वा साध्यत्वम् । साध्यत्वज्ञानस्य तत्प्रतिबन्धकताप्रकारत्वाभावादेव न तत्संभवादिति न च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मरूपसाध्यत्वेन धात्वर्थोपस्थितौ कृत्सन्ने मेहेत्यत्र स्त्वं यायादित्याहवाकाङ्क्षाभावेन क्रियान्तरान्वयो न स्यादिति वाच्यम् तत्रापि चेतत्समभिव्याहारेणाकाङ्क्षोत्थापनात् । स्मिरणादीनां क्रियाया धात्वर्थव्यवहारस्तु क्रियामात्रविशेषणत्वात् अत एव न सिरुगाद्यर्थे कारकाणामन्वयः तेषां क्रियान्तराकाङ्क्षासत्त्वादिति भावः वस्तुतस्तु सिद्धत्वज्ञाने सिद्धं साध्यायोपयुज्यते इति न्यायेन साध्याकाङ्क्षावश्यंदेयेति साध्यतयावगते किमस्य साधनमिति साकाङ्क्षोदयेन साधनाकाङ्क्षोत्थापकतावच्छेदकरूपवत्त्वमेव साध्यत्वम् अत एवाकृपदादाय वे तत्पुमयस्य संगतिः अन्यथा पचतिभवतीत्यादौ सर्वोक्तरूपस्याभावेन तदसंगतिः स्पष्टैव । साधनं तदिच्छिक्रियां निर्वर्त्तयतीति भाष्यस्याये तत्कल्पेऽप्यनुकूलमिति प्रत्यनिर्वर्त्तीकः पक्ष्याशक्तिध्येयम् । केचित्तु पचतीत्यत्र गतव्यवहारादसत्त्वपचितत्वादिकं जातिः तथा चानेकव्यक्तिवृत्तिजातिरेव पचिक्रिया

व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया । उक्तं च वाक्यपदीये । यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति । न च साध्यत्वेनाभिधानेमानाभावः पचति पाकः करोति कृतिरित्यादौ धातर्थत्वावगमे विशेषेऽपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोरेव मानत्वात् तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकरूपवत्त्वमेव साध्यत्वम् तद्रूपवत्त्वमेवासत्त्वभूतत्वम् तदेवाह यास्कः सत्त्वभूतो भावस्तिङ्पदैरभिधीयत इति वाक्यपदीयेऽप्युक्तम् । अयं च व्यापारः फूत्कारत्वाधःसंतापनत्वयत्नत्वादितत्तद्रूपेण वाच्यः पचतीत्यत्र तत्तत्कारकबोधस्यानुभवसिद्धत्वात् न च नानार्थतापत्तिः तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य सत्त्वात् ॥

साध्यत्वं च तस्या व्यक्तिद्वारकमेव स्फोटवदस्याः क्रमवृत्तिः तत्तैरभिव्यक्तिः जातिमन्योक्रियामाहुरनेकव्यक्तिवर्तिनीम् असाध्या व्यक्तिरूपेण सा साध्येवोपलभ्यत इति वाक्यपदीयं चात्र प्रमाणमित्याहुः । तद्रूपवत्त्वमेवेति एवकारेण लिङ्संख्याकारकानन्वयित्वव्यवच्छेदः तस्य नियातार्थसाधारण्येन साधीयस्तभावमात्रइति तत्त्वाभावादिति । एतदेवेति निरुक्तरूपासत्त्वभूतत्वमेवेत्यर्थः भावप्रधानमित्यादि निरुक्तार्थसंग्राहकं असत्त्वभूतो भावश्चेति अस्य पूर्वार्धं सत्त्वभावमापन्नं द्रव्यनामभिरुच्यत इति भावश्चेति चस्त्वर्थे तिङ्पदैरिति पदशब्दबहुवचनस्वारस्येन तिङन्तघटकधातुभिरेवेत्यर्थः अभिधीयत इति । विशेषणतया प्रतिपाद्यत इत्यर्थः तेन कृत्स्न कृतिधातू नामसत्त्वार्थकत्वेऽपि न क्षतिः तिङ्पदैरिति निभावाख्यानाभिप्रायेणेति कश्चित् परे तु पचति भवति अक्षागच्छतीत्यादौ पचतिभ्यां क्रियाकाङ्क्षादर्शनेन निरुक्तवैजात्येनाभानात् तेषु कारकान्वयापत्तिर्या तत्त्वानापत्तिश्च तद्वाचकानां पचादीनाम् एवं कृत्स्नेन मेहेत्यत्र त्वया यादिन्यादौ चेमदेनाकाङ्क्षोत्थापनेऽपि तद्वैजात्येनाभानाद्देवमेव तस्मात्सा क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकत्वेन
धुत्वं निपातत्वमेव । अत एव सञ्ज्ञासूत्रे सर्वे गतिर्गतावित्यत्र भाष्ये क्रम एव मेनतत् सर्वधातवः साधनेन युज्यत इति सर्वधातवः साधनेन युज्यतइतियदुक्तं सत्यमेवेनं साधनं हि क्रियां निर्वर्त्तयतीति तत्संबन्धं विना साध्यत्वप्रतीतेरप्यर्थवसानादित्यर्थकमुक्तम् । इहेरपि प्रयोगार्हैः प्रसिद्धः सम्मेतत्वो र्थो विशेषणैः प्राक् साधनसंबन्धात्क्रियानैवोपजायते इत्याह । उपपदमितिसूत्रे भाष्ये स्फुटोऽयमर्थ इत्याहुः । अयं चेति साध्यत्वेन प्रतीयमानो व्यापारश्चेत्यर्थः । अनुभवसिद्धत्वादिति अत एव ज्वलनादिना वह्निप्रज्वलनदरणाद्यकृत्कारावगृहीतशक्तिकस्य न पचतीति प्रयोगः धागरक्षराज्ञानं चेति विप्रतिपत्तिस्थलीयबोधानुसारादेवेति भावः । न च नानेति । नानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वं नानार्थत्वं तत्त्वापत्त्यादावत्तत्तदिति

नानार्थत्वं

तदापत्तिरित्यर्थः फलांशमादाय तत्त्वाशक्तिरपीष्टमेवेति भावः । बुद्धिविशेषादेरिति । स्वनिरूपितविषयतावच्छेदकत्वसंबन्धेनेति शेषः बुद्धिविशेषविषयतावच्छेदकत्वस्येति यावत् अयमर्थः । यदादीनां चैत्रत्वादिना चैत्राद्यर्थोपस्थापकत्वेऽपि बुद्धिविषयतावच्छेदकत्वेन चैत्रत्वमैत्रत्वादीन्यनुगमय्य तत्तदवच्छिन्नेषु तेषां शक्तिः बुद्धिविषयतावच्छेदकत्वस्योपलक्षणतात्तत्तानतेषां तेन रूपेणाप्रहवो धेनानम् अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वस्येदनानार्थता नैतेषां नानार्थत्वमिति तदादिशक्तिनिरूपणेनिलीतमत्रापि नहदिहाप्यवसेयमिति ॥ तत्र सर्वोपरीभूतत्वेन व्यापाराणां व्यापारान्तरमेलनासंभवात्तत्रेदानीमकक्रियायाश्चैवत्यादेकाक्रियेतिरूपपरत्रीयभाष्यसंगतिरत आह ॥ ६

आख्यातेति । निर्विभक्तिकपाठः साधुः आख्यातप्रतिपाद्यक्रियैकत्वव्यवस्थापीत्यर्थः सप्तम्यन्तपाठे आख्याते तिङन्त इत्यर्थः विषयसप्तमी अध्याहृतज्ञानक्रियापेक्षेति बोध्यम् । बुद्धिविशेषैक्यमिति । संकलनात्मकबुद्धिविशेषरूपावच्छेदकैक्यमादाये
त्यर्थः तथा चावयवाश्रयपौर्वापर्यसमुदायमेकत्वमिति तदादायोक्तभाष्यमिति न तदसंगतमिति भावः तत्र मानमुपन्यस्यति । उक्तं चेति क्रमिकैतद्व्यापारसमूहप्रतिगुणभूतैस्तत्तद्रूपेणाभासमानैरवयवैरुपलक्षितः संकलनात्मकेकत्वबुद्ध्या प्रक(
ल्पिताभेदरूपः समूहः क्रियेति व्यवह्रियत इति कारिकार्थः तेनैतेषां व्यापाराणां वस्तुभूतसमुदायाभावात्तत्र बुद्ध्योपारोपितमिति । निरूप्येत्यस्य संलेपणेत्यादिः प्रकृत्यर्थस्य प्राधान्यात्तन्निरूपणानन्तरं विशेषणप्रत्ययार्थनिरूपणस्यावश्यकत्वादवसर
संगत्या तिङर्थनिरूपणमित्यभिप्रेत्याह । तिङर्थमिति अन्यलभ्यत्वादिति । अनन्यलभ्यो हि शब्दार्थ इति न्यायादिति भावः । एतेन कृतिमतो व्यापारवतो वा कर्तुः शक्यत्वेऽनेककृतिव्यापाराणां शक्यतावच्छेदकत्वकल्पने गौरवमिति निरस्ते व्यापिकाशक्ति
रूपेण समस्तनानात्वविजृम्भितमिति सूचितम् । नन्वाश्रयस्य तिङर्थत्वे आश्रयत्वं शक्यतावच्छेदकं वाच्यं तथा च तस्य स्वरूपाभिन्नतया नानात्वान्नासंबन्धावच्छिन्नतया च नानात्वादननुगमो व्यभिचारश्चेत्यत आह । शक्यतावच्छेदकं चेति । तत्स्यत
इति द्वितीयार्थनिरूपणावसरेऽर्थः तथा च तत्राश्रयत्वे उपाधिरूपस्य तस्य प्रतिपादयिष्यमाणत्वान्न तन्नानात्वप्रयुक्तो दोष इति भावः । मीमांसकमतं निराकरिष्यन् कर्तृकर्मणोस्तिङर्थत्वं व्यवस्थापयितुं शङ्कते । नन्विति । ननु यद्बोधकं तत्र दर्थ
कमिति नियमादाख्यातजन्यकर्तृकर्मप्रतीतिरेव मानमत आह । प्रतीतेरिति संभवादित्यनेनान्यथा संभव हेतुनाह । लक्षणयाः इति नन्वाख्यातस्याश्रये लक्षणेऽतिभावनायामानानुपपत्तिस्तदुपपत्तये तत्र शक्तिकल्पने तन्नाश्रये लक्षणास
भवे युगपद्वृत्तिद्वयविरोधादित्यत आह । आक्षेपादिति । आक्षेपोऽनुमानं तस्मादित्यर्थः । तथाहि अन्विताभिधानवादिमतेऽपदानां विशेषणत्वेनार्थोपस्थापकतया आख्यातार्थभावनाया विशेषणत्वानुपपत्त्याभवति तस्या आश्रयानुमापकत्वम् । अ(
नुमानं चाख्यातपदबोध्यभावना किंचिदाश्रिता विशेषणत्वेन गृहीतशक्तिकत्वात् घटपदबोध्यघटत्ववत् । समानसंवित्संवेद्यत्वं तु नाक्षेपः प्रमेयमित्याश्रयभानेऽभावनायामभागीति भावनापदजन्यभावनाबोधे आश्रयाभावाच्चेति भावः । नन्वाक्षे
पानुसन्धानं विनाप्याश्रयबोधस्यानुभवसिद्धत्वात् यौक्तरीत्या कृचित्वप्राने पि सर्वत्राश्रयभानार्थमाख्यातशक्तिरावश्यकी अन्विताभिधानमतमादायाक्षेपसमर्थने भावनायाः प्राधान्यानापत्तिश्चेत्यत आह । प्रथमान्तपदादेति । समभिव्याहृतप्रथमा
न्तचैत्रादिपदात्तत्प्रतीत्युपपत्तेरित्यर्थः एवं चाश्रयप्रतीतेरन्यथैवोपपन्नत्वादन्यलभ्यत्वान्न तत्राख्यातशक्तिः प्रामाणिकीति भावः । मानमिति । यद्यप्याश्रयस्याश्रयत्वेन भानार्थं तत्राख्यातस्य शक्तिरावश्यकीत्येवोत्तरं वक्तुमुचितम् तथापि धातोः

आख्यातक्रियैकत्वव्यवस्थापकावच्छेदकबुद्धिविशेषैक्यमादायैव । उक्तं च गुणभूतैरवयवैः समूहः क्रमजन्मनाम् बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यत इति यावदर्थं निरूपयति तिङर्थं निरूपयति आश्रयेति फलाश्रये व्यापाराश्रये चेत्यर्थः फ
लाश्रयः कर्म व्यापाराश्रयः कर्ता तत्र फलव्यापारयोर्धातुलभ्यत्वात्तिङस्तदंशे शक्तिरन्यलभ्यत्वात् शक्यतावच्छेदकं चाश्रयत्वं तच्च शक्तिविशेषरूपमिति तस्यार्थनिर्णये वक्ष्यते ननु तयोराख्यातार्थत्वे किं मानं प्रतीतेर्लक्षणयाक्षेपात्प्रथमान्तपदाद्वा
संभवादिति चेन्न । अत्रोच्यते लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रमेव मानम् अत्र हि चकारात् कर्तरि कृदिति सूत्रस्य कर्तरीत्यनुकृष्यते बोधकतारूपां तिवादिशक्तिं तस्यानित्वेन कल्पिते लकार आरोप्य लकाराः कर्तरि कर्मणि चानेन विधीयन्ते नूकारवि
सर्गादिनिष्ठां कर्मकरणादिशक्तिमारोप्य शासादिविधानवत् न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे तथा च कर्तृत्वं कृतिः कर्मत्वं फलमेवार्थोऽस्त्विति वाच्यम् फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनायोगात् । अथ तद्दर्शनान्तरी
यरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र लकारविधिः स्यादिति चेन्न तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिद्ध्येत् कर्तरि कृदिति च लः कर्मणीत्यनेन तुल्ययोगक्षेमम् ॥

फलव्यापारयोः शक्तिरव्याप्तस्याश्रयत्वेन शक्तिरिति मतम् आश्रयत्वेनाश्रयभानलाभादाश्रये त्वाभिमताख्यातशक्तिः सिद्ध्यतीति तत्साधनार्थं सूत्रमेव प्रमाणत्वेनोपन्यस्तमित्यभिप्रेयम् लः कर्मणीति सूत्रे कर्तृवाचकपदाश्रवणात्कथं तदाख्यातस्य कर्तृवाचक(
त्वे प्रमाणमित्याशंकां निरस्यति । अत्र हीति । नन्वेतत्सूत्रं लकाराणामेव कर्त्रादिशक्तिबोधकं नाख्यातस्येत्यत आह बोधकतारूपामिति । बोधजनकत्वरूपामित्यर्थः इदं चादेशिष्वेव शक्तिरादेशानामादेशिस्मृतिद्वारार्थोपस्थापकत्वमिति मतनिरासायोक्तं
प्रपञ्चैतत्स्पष्टावक्ष्यते । विधीयन्त इति । तथा च वर्णस्फोटपक्षे यथा वर्णानामेव वाचकत्वाद्व्यवस्थापयिष्यमाणत्वात्तथा लः कर्मणीति सूत्रस्य तिवादिशक्तिग्राहकत्वं तात्पर्यावधारणेन संभवतीति तस्याख्यातशक्तिसाधकप्रमाणत्वमिति भावः । कर्तृक
र्मपदेऽपीति भावप्रधाननिर्देशादिति भावः । कर्तृत्वं कृतिरिति । कृञो यत्नवाचकत्वेन तत्त्वकृतिः कर्तृत्वं तज्जन्यकर्तृत्वादि प्रसक्तस्याश्रयवाचकतया तद्वत्पर्भावप्रत्ययेन प्रकृत्यर्थप्रकारीभूतधर्मबोधनादिति भावः । कर्मत्वं फलमिति । इदं च कर्मपदादुत्
फलाश्रयेऽरूढिमभिप्रेत्य यौगिकत्वे तु कर्मत्वं कृतिविषयत्वमित्यर्थः स्यात्स चासार्वत्रिकोऽनुपयुक्तश्चेत्यपेक्षितः । शङ्कामिति । तथा च तत्सूत्रबलाद्वकर्तृकर्मणोराख्यातशक्तिः सिद्ध्यतीति भावः दर्शनशास्त्रे न्यायादेरन्यद्दर्शनं दर्शनान्तरं तत्रत्यवादरीत्या
त्तरीया गृहादित्वाच्छः फलधात्वर्थ इति मीमांसकाभ्युपगमेनेत्यर्थः व्यापारस्यान्यलभ्यत्वाभावात्तत्र लकारविधौ न किंचिद्बाधकमिति भावः । यद्यपि कृती व्यापारे शक्तिसिद्धावपि फले शक्तिबोधकं कर्मणीत्यनुपपन्नमेव तथाप्यभिधानानभिधान
व्यवस्थार्थं तत्र शक्तिकल्पनस्यावश्यकत्वमित्याशयादिति । कृतामपीति एवुल्तृजादीनामित्यर्थः ननु कर्तरि कृदित्येव तत्र शक्तिसाधकमत आह । कर्तरि कृदिति चेति । तत्सूत्रादेव कर्तरीत्यत्रानुवर्तते तथा च पूर्वसूत्रस्य कर्तृपदस्य धर्मिबो
धकत्वेऽप्यत्र तस्य धर्मिबोधकत्वम् अत्र धर्मपरतापीत्यत्रापि धर्मपरत्वे तस्यान्यदेवाह । तुल्ययोगक्षेममिति । अलब्धलाभो योगः लब्धरक्षणं क्षेमम् एवं च लः कर्मणीत्यस्यानन्यलब्धभावनायामाख्यातार्थत्वप्रतिपादकत्वोपगमे युक्तिसाम्या(
त्कर्तरि कृदित्यस्यापि कृतां भावनाशक्तिग्राहकत्वम् तस्याश्रयलाभापादेवलाभान्न कृतां तच्छक्तिप्रतिपादकत्वमिति यदि तर्हि लः कर्मणीत्यपि नाख्यातस्य शक्तिग्राहकमिति समानमित्यर्थः ॥ ननु कर्तरि कृदिति सूत्रस्य कर्तृपदस्य धर्मिपरत्वे अनुवृत्तस्य तस्य श

भ॰सा॰द॰ २

त्वाधिकारप्रत्ययेनलोरणविवितिस्तत्रस्य स्यपूर्ववाक्ये क्रियापरकर्मग्राहस्योत्तरवाक्ये कर्मकारकत्वपरत्वमात्रं त्वपरत्वसंभवान्नोक्तदोषः यत्तिचशब्दाधिकाराश्रयणं तस्यैव गमकं तत्र कृतेच तदाश्रयणे प्रमाणाभावो लक्षणया कृत्यादिपरत्वकल्पनेच
गौरवमिति भावः । तथापि शक्तिः कारकं शक्तिमत्कारकमिति पक्षद्वयस्याकरप्रसिद्धतया तद्विकल्पस्य पाति कृतेर्वा व्यवस्थितत्वात् आश्रयणादधिकारपरतायामप्यविरोधान्नोक्तदोषेणेत्याह । अपिचेति । तथाच वैषम्ये बीजाभावादुभयत्रैवै
कार्थपरत्वं नस्यान्याय्यमिति भावः । नन्वाख्यातस्य व्यापारवाचकत्वे कथं तन्नलक्षणेत्यत आह । भावनायाइति । कृदादिवदिति । तेनतत्त्वमिति तत्र तस्येवेति यावत् । अन्निमविहितत्वतिपत्ते कृदादिस्थलइत्यर्थः आदिपदात्कर्तृविहितत्वं द्वितेनेः परिग्र
हः यथा भवन्मते धात्वर्थव्यापारवाचकत्वेन कृदर्थकर्त्रादिप्रभावनायाबोधविषयत्वं तद्वदाख्यातेपीति भावः । तथासति । भावनाया आख्यातावाच्यत्वे सतीत्यर्थः । तस्याः । भावनायाः । प्राधान्यम् । मुख्यविशेष्यत्वम् । वर्तमानयेति । जातिः
पदार्थ इति मते जात्यादिप्रव्यक्तेर्यथा प्राधान्येन भानं तथा कर्त्रादिप्रभावनाया अपि प्राधान्येन भानमुपपन्नस्यत इत्यर्थः यत्क्रियाहकेषुपरिगणितादिवरणाद्भावनावाचकत्वमाख्यातस्याय स्यतीत्याशङ्कते । भावनायाइति । विवरणेति । तत्सम
नार्थकपदान्तरेण तदर्थकथनस्य विवरणत्वं यथा पक्तेः पचनीत्यस्य पाकभावनेत्याख्यातस्य भावनापदेन विवरणादाख्यातस्य भावनावाचकत्वमित्यर्थः विवरणस्य त्वत्त्वमुपपन्नमनुसारितया ननेनार्थनिर्णय इत्याह । पाकानुकूलेति । पचती
त्यस्यैककर्तृकापचिक्रियेति कर्तृविवरणस्यापिदर्शनेनाख्यातस्य भावनायाश्च क्रिरुनकर्तरी मत्रविनिगमनाविरहादिति भावः । इतरेतरयोगद्वन्द्वइति । समाहारद्वन्द्वेतु तत्रपूर्वलक्ष्यार्थसमाहारस्यत्रैवविवरणवदित्यर्थः तत्रचसति
त्यसदित्यादिनिरिक्तस्यानन्वयात्स्पचहिवचनादिनेवोपस्थितेः पूर्वपदस्योत्तरपदस्य वा तत्र लक्षणायाश्च नभ्युपगमादिति भावः । तत्त्वत्वादिति । बोधस्यस्व स्वस्व समस्तमनुसारितया नद्धीन विवरणस्यापि नार्थनिर्णायकत्वमित्यस्य उभयोः
समानमिति भावः । नन्वाख्यातस्य कर्तृवाचित्वे कर्त्रादिप्रभावनायाः प्राधान्यानुपपत्तिः नचाकृतिवादे जात्यादिप्रव्यक्तिवत् प्राधान्यमुपपादितमेवेति वाच्यम् दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात् तथाहि कर्त्रा स्वस्वरूपनिरूपकतया भाव
नाद्विप्यते तस्याश्चधर्मिग्राहकमानसिद्धगुणत्वेन प्राधान्यासंभवः हतीव जात्यानपरिच्छेद्यत यावगतस्य व्यक्तस्य तथैवाते पाडवति तस्य प्राधान्येन भानमिति प्राधान्यानुरोधाद्भावनाया वाच्यत्वमावश्यकमित्यतो दूषणान्तरमाह । किंचेति । अभेदान्व

अपिच मीमांसकानां कृतामियाख्यातस्यापि कर्तृवाचित्वमस्तु भावनायाएवास्त्वपेन कृदादिवन्नुतीतिसंभवेन तस्यावाच्यत्वमास्तु तथा सति प्राधान्यं तस्या न स्यादिति चेन्न वर्तमानयेत्याद्याख्यातप्रव्यक्तेः प्राधान्यवदुपपत्तेः पचती
त्यादौ भावनाया विवरणदर्शनात् वाच्यत्वमिति चेन्न पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात् नच कर्तृविवरणं तात्पर्यार्थविवरणं पाकं करोतीत्यत्राप्यर्थकमत्वविवरणवदितरेतरयोगद्वन्द्वे साहित्यांशविवरणवदेति नेतदर्थनिर्णाय
कमिति वाच्यम् भावनायामपि तुल्यत्वात् किंच पचति देवदत्त इत्यत्राभेदान्वयदर्शनात्तदनुरोधेन कर्तृवाच्यत्वमावश्यकम् फलदेवदत्त इतिवत् नचाभेदान्वये समानविभक्तिकत्वं तन्त्रम् तच्चात्र नास्तीति वाच्यम् सोमेन यजेत लोकं पचति राजपुरुष इत्यादावप्यभेदान्वयानापत्तेः

नियामक

यद्दर्शनादिति । देवदत्ताभिन्नैककर्तृको वर्तमानो व्यापार इति बोधस्याकरसंमतत्वादित्यर्थः । तदनुरोधेनेति । अभेदान्वयानुरोधेनेत्यर्थः । आवश्यकमिति । अन्यथानुभूयमानसर्वसंमततादृशबोधापलापापत्तेरिति भावः । नियामकमिति । तद्भिन्नस्तत्तना
मार्थनिष्ठभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतासंबन्धेन शाब्दबोधं प्रति तद्भिन्नसमानामजन्योपस्थितेर्हेतुत्वस नीलो घट इत्यादौ व्यभिचारादिति भावः । तत्रेति । अभेदान्वयबोधप्रयोजकसमानविभक्तिकत्वं चेत्यर्थः । यत्र । देवदत्तः पचतीत्या
दौ तादृशनियमस्यासार्वत्रिकत्वं दर्शयितुं व्यतिरेकव्यभिचारस्थलमाह । सोमेनेत्यादिना । ननु अत्र यागे सोमस्य करणत्वेनैवान्वये नाभेदेनान्वयाभावात्कथमत्र नियमस्य व्यभिचार इति चेन्न सोमेन यजेतेति हि विशिष्टविधिः अत्र यो
ब सोमयागयोरनेन विधानात्सोमवता यागेनेष्टं भावयेदिति विशिष्टस्यैकत्वाच्च न वाक्यभेदः नत्वत्र मत्वर्थलक्षणां विना सोमस्य यागेऽन्वयः संभवति अतो विशिष्टविधित्वोपपत्तये यमावश्यकी तथाहि यदि सोमयागयोरेकरूपेण कर
णत्वेन भावनायामन्वयः सोमेन यागेनेष्टं भावयेदिति तदोभयविधाने वाक्यभेदः सोमस्य यागवत्फलभावनाकरणत्वेन प्राधान्यापत्तिर्यागगर्थत्वानुपपत्तिश्च प्रत्ययगाम्यफलभावनायाः समानपदोपात्तयागेनैव करणाकाङ्क्षायाः निवृत्तत्वेन विभि
न्नपदोपात्तसोमस्य करणत्वेनान्वयानुपपत्तिश्च प्रसज्येत नापि वैयधिकरण्येन सः यागेन सोममिति अन्वये समानपदोपात्तफलभावनायाः करणत्वेनान्वितस्य यागस्य सोमकर्मकभावनान्वयानुपपत्तेर्यागस्य सोमार्थत्वापत्तेश्च नचेष्टापत्तिरदृ
ष्टकल्पनापत्तेः नहि यागे सोमार्थत्वं दृष्टद्वारा संभवति व्रीहिषु अवघातेनेव सोमे यागेन कस्यचिद्दृष्टस्याजननात् तस्मात्तेन सोमे किंचिददृष्टं जननीयं प्रोक्षणेनेव व्रीहिषु एवं यागस्य सोमार्थत्वे फलभावनायां सोमस्य करणत्वेनान्वयो वाच्यः भा
वनाकरणत्वेच भावनाभाव्यनिर्वर्तकत्वमेव नच सोमो हृष्टमन्त्रेण फलोत्पादनायालं यतः जुहोतीतिवाक्यविहितहोमेन तस्य भस्मीभावात् अतोऽदृष्टकल्पनापत्त्या न यागस्य सोमार्थत्वमिति तेन यागेन सोममित्यन्वयः संभवति करणत्वेनो
यागस्य पस्थितस्य सोमस्य साध्यत्वेनानन्वयापत्तेश्च सोमेन यागमित्यन्वयाभ्युपगमे तु यद्यपि सोमस्य यागार्थतायागनिष्पत्तिरदृष्टमेव प्रयोजनं संभवतीति नादृष्टकल्पनप्रसंगो नापि करणत्वेनोपस्थितस्य साध्यतान्वयानुपपत्तिः करणत्वेनैवान्वयात्त
थापि प्रत्ययार्थभावनाकरणत्वेनान्वितस्य साध्यत्वेनान्वयानुपपत्तिरुद्धरिदरेवेति सोमपदस्य मत्वर्थलक्षणया सोमवता यागेनेष्टं भावयेदिति विशिष्टार्थविधिरत्रेति मीमांसकसिद्धान्तस्तथा च तत्र समानविभक्तिकत्वाभावेपि सोमपदार्थस्य सो
मवतो यागेऽभेदान्वयेन व्यतिरेकव्यभिचारेण तादृशनियमोऽसिद्ध इति भावः । लोकं पचतीति । अत्रापि धात्वर्थव्यापारकर्मफलविशेषणलोककर्मत्वैकत्वलोकस्य कद्रूपस्वविभिन्नविभक्तित्वेपि तदर्थस्य फलेऽभेदान्वयाद्व्यभिचार इति भावः । ननुसमा २

नविभक्तिकत्वं नामार्थाभेदान्वये प्रयोजकं न तु धात्वर्थनामार्थाभेदान्वयेऽपि अत एव स्तुत्यन्तोः समानविभक्तिकनामार्थयोरिन्दुपानं नामत्वं च वक्ष्यते तथा च प्रकृते तत्र योगिप्रतियोगिनोर्नामार्थत्वाभावान्नोक्तदोषो न स्मादिः । आ
जेति । यद्यपि सोमेन यजेतेत्यत्र देवदत्तः पचतीत्यत्रापि समानविभक्तिकत्वस्याऽभेदबोधे तन्त्रत्वाभिमतबोधान्वयात्ते धात्वर्थादिवाचित्वं सिद्धमेव तथापि स्तुत्यन्तेनो नामार्थद्वयविषयकत्वे व्यभिचारो दुरुद्धर एवेत्या
शयेन नामार्थद्वयस्थले तत्प्रदर्शनमिति बोध्यम् नैयायिकमतेनेदम् तैः कर्मधारयषष्ठीतत्पुरुषे च सर्वपदशक्यतावच्छेदकान्यतरस्योत्तरपदार्थेऽभेदान्वयोपगमात् स्वमते तु उक्तस्वार्थद्वयमभ्युपगमेन तत्र पदार्थयोर
न्वयस्यैवाभावेन नोक्तस्तुत्यन्तविषयत्वेनेति बोध्यम् इदमुपलक्षणं षष्ठ्याद्यर्थबहुव्रीहेरपि तत्र चान्नोभयोरपि नामार्थत्वेन व्यभिचारो दुर्वार इति भावः अन्ये तु उक्तस्तुत्यन्तविष्यासविषया समासेत्वसति बाधके समस्तप
दयोरन्वय इति तत्पूर्वापरीभाव एवाकांक्षेति नात्रोक्तदोषप्रसङ्गः । अधिकमग्रे वक्ष्यते सामानाधिकरण्यमिति । पदार्थयोरभेदसम्बन्धः । यौगिकानामिति । योगोऽवयवशक्तिस्तन्मात्रप्रत्युत्कारेण शक्तानामित्यर्थः । द्र
व्यवाचित्वानापत्तेरिति' ध मित्रुक्तत्वानापत्तेरित्यर्थः । एवमिति । लक्षणयैव सामानाधिकरण्याभ्युपगमेऽपीत्यर्थः । वैश्वदेवीत्यादितद्धितानामपीति । द्रव्यवाचित्वानापत्तेरिति शेषः तेनान्वितं तथा च बलाबलाधिकरणोच्छेदापत्ति
रिति भावः । तथाहि । तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमिति श्रूयते । अत्रायं संशयः । किमनयाऽऽमिक्षया वाजिनोभयगुणकमेकं कर्म विधीयतेऽथवा तत्तद्गुणदेवताभिन्नकर्मद्वयमिति तत्र वाजिना
त्ररूपेण सम्बन्धाद्वाजिनोऽपि देवतासाम्यत्वाद्वाजिनगुणेन विधीयते तेनोभयगुणकं वैश्वदेवमेकं कर्मेति प्रथमपक्षे वैश्वदेव्यामिति त्वत्र तद्धितस्य देवतासम्बन्धार्थकतया श्रौतः सम्बन्धो वाजिभ्यो वाजिनमित्यत्र तु वाक्येन सः पदान्तरापेक्षा
यामपि सम्भिन्नार्थकपदान्तरसापेक्षत्वाच्छ्रौतत्वबाधः सम्बन्धस्य यत्र तु भिन्नार्थकपदान्तरापेक्षा तत्रैव वाक्यस्य प्रामाण्यात् एवं च वैश्वदेव्यामिति त्वत्र तद्धितेन वैश्वदेवयागानुवादेन वाजिनगुणविधानश्रौतद्रव्येण निराकाङ्क्षत्वात् ततः कर्म
न्तरविधिर्वाजिभ्य इति चापूर्वदेवताविधानमिति राद्धान्तः यदि च तद्धितस्य देवतासम्बन्ध एव शक्तिस्तदा वाजिनामित्यत्रैकस्य विनियोगस्य साम्यादामिक्षाद्रव्येण देवतासम्बन्धस्य श्रौतत्वमिति सिद्धान्तासङ्गतिः न च लक्षितद्रव्यमादाय श्रौतत्वा
जिनन्तु न तथेति सिद्धान्तस्यायुक्तत्वात् एवं हि नानार्थं तद्धितेति निषेधस्यापि प्रत्याक्षुरुषार्थत्वसम्भवात् स्वातन्त्र्यसाधनप्रयासवैफल्यापत्तेः क्रतुधर्मत्वसिद्धान्तासिद्ध्या कर्त्रधिकरणोच्छेदप्रसङ्गाच्चेत्यलम् । अनुपासनलाभादिति । ३

न च लक्षणया कर्तृत्वरूपत्वात्सामानाधिकरण्यम् पिङ्गाक्ष्यादिपदानामपि यौगिकानां द्रव्यवाचित्वानापत्तेः एवं च वैश्वदेवीत्यादितद्धितानामपि अनेकमन्यपदार्थे साम्यदेवते त्वनुशासने तु पिङ्क्तेः अस्यां विश्वेदेवा देवता अ
स्या इति विग्रहदर्शनात् प्रधानषष्ठ्यर्थ एवानुशासनलाभात् तथा चारुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति वाक्ये द्रव्यानुक्तेरारुण्यस्यैवाक्रोपाद्द्रव्य एवान्वयप्रतिपत्त्यारुणाधिकरणोच्छेदापत्तिरिद्रव्यवाचकत्वसाधकयुक्तेः सा
मानाधिकरण्यस्योक्तरीत्यैवोपपत्तेरिति प्रपञ्चितं तत्रैव ॥
एवं लक्षणमिदं युक्तेरपि तथाहि लट्परात्प्रत्ययार्थप्रकारकबोधे एव हेत्वादिवदन्यत्र लिङ्गसम्बन्धबोधनमिति शब्दैः सर्वत्र नायमेव सिद्धा न्तस्तत्राधिकरणन्यायेन संबन्धमात्रं मतुबादिवाच्यं सादृश्यवदेव तत्र सगोमत्त्वमित्यत्र स्वत्वप्रत्ययस्य संबन्धबोध
कत्वं संगच्छते हरत्वमित्यादौ प्रकृत्यर्थे हरत्वबोधकत्ववत् प्रकृतिजन्यबोधप्रकारस्यत्वप्रत्ययार्थतादिशेषस्य संसर्गस्य कथं तत्त्वबोध इत्याशंकातः ज्ञानविज्ञमित्येव यत्तत्स्वत्वादित्वप्रत्ययस्य प्रकारत्वे वृभानात् एवमतद्वि
तवहुव्रीहेरपि एकं हायनमस्या इति विग्रहे देवतार्थकतद्धितस्यापि विश्वेदेवा देवता अस्या इति विग्रहे च तथा च संबन्धस्यैव प्राधान्यदर्शनात्तस्यैव वृत्तिवाच्यत्वनिर्णयः उक्तं च यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते तस्यापि प्रत्ययार्थत्वात्सं
बन्धस्य प्रधानतेति । न च गोमानित्यादौ संबन्धिप्रतीत्यनुपपत्तिः अभ्यासेन संबन्धेनाक्षेपादुपपत्तेः न बकारे त्वत्र संबन्धवच्च न चासत्वभूतसंबन्धस्यैव वृत्तिमन्नार्थतया तद्धितमतवादेः स्वाहेशसंबन्धबोधकत्वे तस्मिं लिङ्गसंख्यान्व
यानुपपत्त्यासत्वभूत संबन्धपरत्वानुशासनानारोणसाक्षिरभ्युपेया इत्यं च द्रव्यमेवार्थोऽस्त्वर्थी यस्मात्संबन्धत्वात्तेपलभ्यपद्वक्तिनस्यात् किं च मतुबादेः संबन्धसामान्यार्थकत्वे तस्य संबन्धादिपदपर्यायतापत्त्या तद्धितार्थकत्वमे
वोरीकरणीयम् तच्चेच्चानुयोगिप्रतियोगिनिरूपत्वम् तथा चैकस्य निरूपकस्य प्रकृत्योपस्थापनेऽपरानुयोगिरूपनिरूपकभानार्थं तत्र शक्तिकल्पनेऽत्यनतीव गौरवमिति वाच्यम् मत्वादेस्सत्त्वभूत एव संबन्धो वाच्योऽत एव संबन्धानामनेक
त्वे लिङ्गत्वेऽपि वदन्यापदिशाहानामेकवचनान्तत्वं नानालिङ्गकत्वं च संबन्धिनां तथात्वप्रवाहदर्शनात् तथा च मतवर्थस्य संबन्धे लिङ्गाद्यन्वयासंभवाच्चेर्वादेः संबन्धिनः शक्त्योत्तरार्थसंख्येयत्वे कर्त्रादेः लिङ्गसंख्यान्वयित्वस
पासत्त्वभूतत्वमपि षष्ठ्यादावर्थे सिद्धम् प्रत्ययार्थे लिङ्गसंख्यादेः प्रत्ययार्थ एवान्वयासंभवात्तत्यानामिति श्रुत्यन्तेऽप्येवं तत्रासत्त्वभूततत्त्वेन संबन्धः षष्ठीवाच्यः यत्त्वनुयोगिप्रतियोगिनिरूपकभानार्थं तत्र शक्तिकल्पनेऽत्यतीव
गौरवमिति तदपि न संबन्धप्रत्यक्षेऽपि यावदाश्रयभानापत्त्या न शाहे येन तदनुरोधेन तत्र शक्तिकल्पना गौरवं संबन्धशक्तिवादिमते संभाव्येत तत्स्मात्तु मत्वादेः शक्तो न किंचिद्बाधकमिति प्रपञ्चितं चैतदन्यत्र एवं चैकहायन्यादिपदानां संबन्ध
वाचकतया मत्वनुशासनस्य तदनुगुणत्वात् न वक्तीनो युक्तीनां वसन्त्वात्तत्रैव शक्तिः सिद्धेत्तत्संबन्धिनीत्यारुण्यलक्षणार्थः । अरुणाधिकरणोच्छेदापत्तिरिति । तथाहि अरुणया पिङ्गाक्ष्यैकहायन्या सोमं क्रीणातीति श्रूयते तत्र किमरुणिमैवाक्रा

भ॰ सा॰ द॰
४

सिद्धान्तः

इष्टत्वप्रकरणेऽनिवेशनीयः किं वा क्रीणातिना संबध्यते तदर्थमेकहायन्यादिरिति संशये क्रीणातिना संबद्धसामानाधिकरण्ययोगात्कारणैकैकं स्यात्तच्चार्थसिद्धं स्यात्तच्च युक्तमिति नास्यकार्यसंबन्धः इति एषः अतः प्रकरणेऽनिवेशनीय इति एवं च प
त्तेः । सिद्धान्तस्तु संभवति सन्निहिते तत्पदार्थे तत्प्रकरणनिवेशानौचित्यात् पिंगाक्ष्यादिपदानां द्रव्यवचनतया तदर्थे त्वयसैन्यभ्येन तद्वाराक्रीणात्यर्थेनान्वयसंभवाद्वाक्यव्यवस्थकत्वमेवतस्येति सं चानुपपन्नः पिंगाक्ष्यादिपदानां योगिकानां गुणमात्र — संबन्धेनान्विति त्यादिग्रन्थः
सव्यापार्थकतया द्रव्यस्यैव रूपादानात् किं च सर्वपक्षेऽप्यसंभव इति किं च पिंगाक्ष्येकहायनीभ्यां द्वयोरुक्तयुक्त्या संबन्धस्यारूपपिंगाक्ष्येकहायनीत्वबोधकतया तयोरप्यरुणत्वात्करणत्वासंभवेन क्रीणातिकरणत्वस्यैव हाकारत्वाभावादरुणत्वस्य वा
क्यभेदशंकायाप्यसंभवात् विघटितत्वेन द्रव्यविध्युपपत्तौ वाक्यभेदशंकायामलशेषित्वाच्च वहुव्रीहेरेकहायनपदस्य चलात्तत्र कद्रव्यविधायकतया प्रविशिष्टत्वेन वहुव्रीहेरेवद्रव्यविधायकत्वेनारुणपदस्येतत्र विनिगमकाभावात्
वाक्यभेदेन प्रकरणे निवेशस्याप्यसंभावितत्वाच्च तथा हि प्रकरणे पूर्वोक्ताक्रियाभिः कारकतावच्छेदे पि संबन्धसंभवी मन्त्रपाठानि वद्व्याणिकं च गुणेनानेन संबध्येरन् तृतीयया प्रकरणानिद्रव्याणयनुगुणेनस्य परिच्छेदकत्वेन वि
धीयते धर्मिबोधकत्वात्तृतीयायाः इति तद्व्याणामनुपात्ततमपीत्यपि नवकोशकास्य शक्तिर्विभक्त्यर्थेऽनिसिद्धान्तभङ्गापत्तेरिति । सामानाधिकरण्येति । अभेदार्थबोधस्येत्यर्थः । उक्तरीत्येति । संबन्धित्वलक्षणकल्पनेनेत्यर्थः । प्रपंचितमिति । प्र
पञ्चलक्षणाः । अपवर्ग इति । आख्यातार्थसमासमाक्तिनिरूपणसरत्वर्थः तत्कार्यज्ञानस्य पदार्थज्ञानाधीनत्वादुपजीव्योपजीवकभावसंगत्या वाक्यार्थनिरूपणमित्याशयेनाह । पदार्थनिरूप्येति । विशेषेणेति । आधाराधेयभावसंबन्धे
न प्रकारविलक्षणः संख्यायाचाख्यातार्थकर्तृकर्मान्वयित्वे प्रयोजकमाह । समानप्रत्ययोपात्तत्वादिति । एतेन समानपदोपात्तत्वेनाकांक्षापेक्षया बलवत्त्वात्समानपदोपात्तान्वयित्वे विहाय प्रथमान्तार्थेन्वयोऽनुचित इति निरस्यते एकपदजन्योपस्थितिवि
षयत्वादितिस्तदर्थः । आख्यातजन्योपस्थितिविषयत्वस्य वाच्यतामनेकालेपि सत्त्वात्तत्र व्यभिचारवारणाय कर्तृकर्मविषयत्वेनमविशिनष्टि । तथा चेति । हरस्त्यादावेकत्वादिसंख्याप्रकारकबोधव्यभिचारवारणाय कार्यतावच्छेदककोटौ
वाख्यातार्थेति । तस्य कालप्रकारकबोधेन हारणाय संख्येति । स्तोकमाख्यातस्य कर्तृकर्मार्थकत्वं वद्धयितृप्रसंगान्याघमत्यनिराकरोति । नैयायिकानामित्यादिना । प्रत्ययादिति । समानपदोपात्तयोरेकान्वयित्वसंकोचितत्वाविजितत्वादिनिभा
४ पदार्थनिरूपणवाक्यार्थनिरूपयति । फलश्यादिना । फलेति किंत्यादि फलंप्रति तिरथ्यः कर्तृकर्मसंख्याकालाः । तत्र कर्तृकर्मणी फलव्यापारयोर्विशेषणे संख्या कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि समानप्र
त्ययोपात्तत्वात् तथा चाख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः । नैयायिकानामाख्यातार्थसंख्यायाः प्रथमान्तपदार्थेऽन्वयात्तत्राख्यातार्थसंख्याप्रका
रकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः सोपि चन्द्र इव मुखं इत्यत्र देवदत्तो भक्ताभिगती स्त्रादौ चन्द्रकार्थयोरन्वयादित्वरविशेषणत्वहेतिरस्त्वतिगौरवम् एवमपि कर्तृकर्मणोराख्यातार्थत्वे मानत्वि
तिसंख्यावच्छे
वः आख्यातार्थकालप्रकारकबोधे प्रथमान्तपरजन्योपस्थितेरपेक्षणाराह । संख्येति । इतराविशेषणत्वेति प्रथमान्तार्थेतद्विशेषणत्वहेतिरित्यर्थः तथा चेतरविशेषणतानापन्नार्थविषयकोक्तोपस्थितिः कारणमित्यर्थः एवं च
चन्द्रभोजनादीनां प्रथमान्तार्थत्वेपि तदर्थसादृश्यव्रजनादिविशेषणत्वान्नव्यभिचार इति भावः । तदितरेति । तदविषयकं घतीत्यविषयकमित्यर्थः । तदवच्छिन्नावच्छेदकताककारणताग्रहे विषय इति यावत् इतराविशेषणत्वं चेतर
विशेषणत्वनाम्यविषयतात्यावत् । इतराविशेषणत्वं चेतरविशेषणत्वनाम्यविषयत्वम् तत्रचैत्रः इव गच्छतीत्यादौ चैत्रे केवलेकपदेनाये तद्बोधे चैत्रीयसादृश्यमित्यवाक्यबोधाभावेन चैत्रस्य तरनिरूपितप्रकारतान्यत्वरूपेतरा
विशेषणत्वस्य तत्प्रतीतिः अविशेषणत्वेपि विशेषणतानाम्यविषयत्वात् ततः तथाख्यातार्थसंख्याप्रकारतानिरूपितविशेष्यतासंबन्धेन बोधं प्रतीतरविशेषणत्वतानाम्यविषयतानिविशेष्यतासंबन्धेन प्रथमान्तपदजन्योपस्थितेः
कारणत्वमिति पर्यवसितोऽर्थः प्रकृते च चन्द्र इवास्याथ योरिवार्थसादृश्यानन्वयं व्रजनादिविशेषणत्वताम्यविषयत्वान्नवृत्तिः चैत्रेण सुप्यतइत्यादौ चैत्रकर्तृकः स्वापइति बोधादिविशेषणत्वापन्नत्वया रणायप्रथमान्तेतिपद
विशेषणम् । यद्यप्येवमपि चैत्रः पचति तीरादावन्वयो गच्छेदरूपैककारपदार्थेकदेशे चान्वयेत्रैव चैत्रस्य विशेषणतानन्तसंख्यान्वयानुपपत्तिरिति विभाव्यते तत्र प्रथमान्तार्थो विशेषणत्वमात्रताम्यर्थविषयत्वेन विशेषणत्वे
यः रत्नरागः सापि निवेशप्रयोजनाभावात् उक्तस्थले चैत्रस्य मुख्यविशेष्यत्वविशेषणत्वाभावेन तामसंख्यान्वयानुपपत्तिरिति तन्मतनिष्कर्षः । अतिगौरवमिति । आन्यलभ्यत्वेनोपस्थित्वकल्पने संख्यान्वयबोधे तत्प
स्थितौ विभिन्नपदजन्यत्वनिवेशपव गौरवम् प्रथमान्तपदार्थस्य विशेषणत्वमात्रतात्म्यविषयत्वेन विशेषणेत्वनिगोरवमित्यर्थः । इदमपीति । उपदर्शितकार्यकारणभावेनाप्येवमपीत्यर्थः यद्यपि तन्मतेभावनान्व
यिनि संख्यान्वयनियमाद्राख्याततेन भावनाविषयकसंख्यान्वयबोधस्य क्राप्यजननाद्वरनान्वयबुद्धि तस्यसंख्यान्वयबुद्धिव्यापकतया व्याप्यधर्मावच्छिन्नसामग्र्याफलेऽजननीये व्यापकधर्मावच्छिन्नसामग्र्याप्रयोजिक ४
तया विशेषणत्वमात्रताम्यविषयत्वविशेषणत्वविशिष्टप्रथमान्तपदार्थोपस्थितिरूपायास्तस्याः सदानीमभावादेव न चन्द्र इवेत्यादौ व्यभिचारप्रसक्तिरिति न संख्यान्वयबोधकारणतावच्छेदककोटाबुक्तविशेषणप्रवेश

त्स्यापि कृतिशक्तिवादपक्षे भावनान्वयबोधकारणतावच्छेदककोटौ वैशिष्ट्यप्रवेशेतराविशेषणत्वादिनिवेशप्रयुक्तगौरवमसम्मतेन प्रथमान्तपदार्थस्याख्यातार्थे विशेषणतयैवान्वये न च चन्द्रादेरेकत्वविशेषणतयान्वितस्यापरत्वविशेषणतयान्वि
तस्यापि कृतिशक्तिवादपक्षे भावना... विस्तरः । न्यायविदस्तु । लाघवोपपत्तेरित्यादि ... स्वधर्मवाचकत्वसिद्धावुत्तरकालकल्पनादृशकार्यकारणभावप्रयुक्तगौरवे
एकाकृत्वात् तत्त्वयायोगात्तत्र द्वितीयेष्वलोपादानप्रयुक्तगौरवमिति न दोषः इदमेवाभिप्रेत्योक्तमिदमश्चीत्यत्र विस्तरः । न्यायविदस्तु । लाघवोपपत्तेरित्यादि कदम्बेनाख्यातस्य धर्मवाचकत्वसिद्धावुत्तरकालकल्पनादृशकार्यकारणभावप्रयुक्तगौरवे
निपातस्य पत्र्यधिकरणन्यायेनाकिंचित्करम फलमुखत्वात् किंच चन्द्रादुपमानेष्वाख्यातार्थसंख्यान्वयाभ्युपगमेऽपि न क्षतिः तत्र तदनन्वयेऽसाहृष्यप्रयोजकधर्मलाभे नाशुद्धार्थतापत्तेस्तत्तत्तन्मत्कारानापत्तेश्च क्रान्तार्थे भोजनादौ तत्तज्जनानुकूला
त्वाख्यातार्थस्यायोग्यतादेवानन्वयः तथाच नेतराविशेषणत्वविशेषणप्रवेशप्रयुक्तगौरवशंकालेशोऽपीति प्राहुः कर्तृकर्मणोः संख्यायाश्च विशेषणत्वं तत्र स्थापककालस्यतान्यवस्थापयति । कालस्त्विति । व्यापारे । धात्वर्थव्यापारस्य
र्थः । नन्वाख्यातस्य कालशक्तिपरिच्छेदके वर्तमानेलडित्यादिसूत्रेषु व्यापारवाचकपदानुपादानात्कथं कालस्य तद्विशेषणत्वे व्यापारकालस्य व्यापारविशेषणतायां मानं प्रदर्शयितुमाह । तथाहीति । नचेति । धातुपदे चेत्यर्थः । धात्वर्थ
ति । फलव्यापारोभयात्मकमित्यर्थः । भूसत्तायामित्यादिगणपाठात्सत्त्वादिसत्त्वप्रामाण्याच्चेति भावः वदत । बोधयत सत्त्वासत्त्वादिति वक्तृता व्यापारे तदन्वये हेतुमाह । प्राधान्यादिति । मुख्यविशेष्यतया योपस्थितत्वादित्यर्थः व्यापारमेवेति । एव
कारेण फलव्यवच्छेदः अप्राधान्याद्गुणत्वाच्चपरार्थत्वादसंबन्धः समत्वात्स्यादिति न्यायात्तदर्थस्य सामानाधिकरण्यविशेष्यान्वयित्वनियमाच्चेति भावः प्राधान्यादिसत्त्वायमतेकर्माख्याने फलस्य प्राधान्यं तन्मते फलपदान्वयरतिधनितम् ।
ग्राहयतीति । आख्यातार्थकालविशेष्यतया बोधयतीत्यर्थः । कर्तृकर्मणोरेवेति । समानप्रत्ययोपात्तत्वादिति भावः । पचतीत्यापत्तेरिति । कर्तृविद्यमानत्वादिति भावः पचमन्त्रेपि । नापि फलरतीति । केचित्तु फलव्यापारयोः पृथक्छक्तौ
तयोरुद्देश्यविधेयभावेनान्वयापत्तिः उपस्थितयोस्तयोरन्वयस्यौत्सर्गिकत्वात् तथान्वयबोधे तत्र दानजन्यतत्रद्बोधस्य प्रतिबन्धकताकल्पने तु गौरवम् । तस्मात्फलावच्छिन्नव्यापारे व्यापारावच्छिन्नफले च धातोः शक्तिः कर्तृकर्म
र्थकतत्रसत्वयसमभिव्याहारस्त तत्रद्बोधे नियामकः गौरवप्रामाणिकत्वान्नदोषाय रंस्यचकर्त्राख्यातेव्यापारस्य प्राधान्यं कर्माख्याने तु फलस्य यदा यस्य प्राधान्यं तदा तस्य कालान्वयः तत्र स्य धातुपदादुभयोरपि प्राधान्येनोपस्थित
त्वा फलानुत्पत्तिदशायामारब्धे पाके फले वर्तमानत्वारोपाद्व्यापारे फलत्वारोपाद्वा पच्यते इत्यस्योपपत्तिः एकाश्रयत्वेपि समहारोपाद्वधि अग्रयणकालेपच्यतीति प्रयोगवत् आरोपे च प्रतीतिरेव मानम् व्यापारविगमे फलसत्त्वेप्यपाचिदेव
कालस्य व्यापारे विशेषणत्वम् तथाहि वर्तमानेलडित्यधिकारात्साधातोरिति लब्धे तस्यधात्वर्थवत् प्राधान्याद्व्यापारमेवाहयतीति तन्नैवन्न्वयः न च संख्यावत्कर्तृकर्मणोरेवान्वयः शंक्यः अतीतभावनाकेकर्तरिपचतीत्यापत्तेः अपतीदित्य
नापत्तेश्च पाकानारम्भदशायां कर्तृसत्त्वे पक्ष्यतीत्यनापत्तेश्च नापि फले तदन्वयः फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पक्ष्यतीत्यापत्तेश्च सत्त्वबोधयम् नव्यामवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वादुत्तिष्ठतीतिप्रयोगापत्तिः पर
प्रयत्नस्यानात्तानादप्रयोगात् किंचिच्चेष्टादिनावगतो चायमुत्तिष्ठतीति शब्दभावात्फलेनजायते इति लोकप्रतीतेरिष्टत्वात् एवंचतिङर्थविशेषणमेव भावनैव प्रधानम् यद्यपि प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यमन्यत्र दृष्टं तथापि भावप्रधानमाख्यातम् ॥
दृष्टेनेष्टादिप्रयोगात्तु भूतत्वस्योत्तिष्ठतित्वादिमाहुः व्यापारेष्वाख्यातार्थकालान्वये दूषणमाशंक्यनिरस्यति । नचेति । यत्नसत्त्वादिति । व्यापारस्य वर्तमानत्वेन विषयाबाधान्मतेफलेकालान्वयोपगमेनतदानीं फलस्यासत्त्वात्ताहृशप्रयो
गस्याप्रामाण्यापत्तिरिति भावः ननु परप्रयत्नस्य विजानीयात्मनः संयोगरूपहेत्वभावादप्रत्यक्षत्वे अनुमानेनचेष्टादिपक्षकेणानरवगतानुत्तिष्ठतीतिप्रयोगापत्तिर्दुःसमाधेयैवेत्याशङ्क्याह व्यापारमपि हरति । किंचिच्चेष्टादीति । इयं चेष्टाप्रयत्नजन्या
कृतिविनाऽसत्त्वेऽसतिसत्त्वात् मदीयचेष्टावदिति चेष्टापक्षकानुमानेनप्रयत्नानुमितावित्यर्थः अप्यवास्त्वायावच्छिन्नत्वसंबन्धेन चेष्टादिहेतुनाप्रयत्नानुमितावित्यर्थः । वस्तुतस्तु न प्रयत्नस्योत्थानोद्देश्यकत्वेन स्थानप्रयोजकत्वाभावात्
क्रापत्तिरनपेक्ष्यानाद्यततरस्यैव तत्प्रयोगः यागपाकाद्युद्देश्यकऋत्विक्पक्ततण्डुलरूपफलादिदृशायां यागार्थयतनतरति वज्जतीतिप्रयोगवारणाय प्रयोजकता विशेषस्यैव संबन्धतायाअवश्याभ्युपेयत्वादिति ध्येयम् । एवंचेति ।
विशेषणमेवेत्येवकारेणतिङर्थस्य विशेष्यत्वव्यवच्छेदः । भावनैवेति । धात्वर्थभावनैवेत्यर्थः प्रत्ययार्थभावनायाः प्राधान्यस्य परैरङ्गीकारात्तद्व्यावृत्तानासंगतेः एवकारेण फलस्य तिङर्थकर्त्रादेश्च व्यवच्छेदः प्रकृतिप्रत्ययार्थयोरिति सूत्र
निविरोधमाशंकते । यद्यपीत्यादिदृष्टमित्यन्तेन । अन्यत्रेति । पक्त्वादाविर्त्यर्थः । दृष्टमिति । तथा च प्रकृत्यर्थभावनाप्राधान्योपगमेन हि दोष इति भावः । भावप्रधानमिति । नामाख्यातोपसर्गनिपातभेदेन चतुर्विधपदं प्रकृत्य नामा
ख्यातलक्षणप्रतिपादके इमे वाक्ये आख्यातभावप्रधानमिति योजना यथाश्रुते यदुद्देश्योगः प्राथम्यमितिमायुद्देश्यलक्षणमित्यपि युक्तं ह्यधात्वर्थस्य हृद्बोधेऽपि द्विर्दिष्टस्यैवोद्देश्यत्वया चरमनिर्दिष्टस्य विधेयतयाविवृतितात्पर्यालाभात्
अतएव उद्देशानां गुणानां विभ्योद्देश्यतावच्छेदकविधेयायोरैक्ये न गुणोपाधेशाबोधानुपपत्तिरा शंकितावर्द्धमानोपाध्यायैः उद्दिश्यत्वे भावो विहृद्बिशाहृश्राप्यमोपादानस्य मंगलार्थकत्वोक्तिरप्यतएवसंगच्छते अतएव
यत्कारोद्ययमेवमेवदरयत्तत्राप्यसौनापसरत्यादावविमृष्टविधेयांशत्वादोषप्रसरो विधेयस्य प्रथमोपादानादित्यालङ्कारिकसरणिरिति प्रकृतमनुसरामः । आख्यातत्वावच्छिन्नप्रधानभावप्रतिपादकत्वरूपलक्ष
णात्ययोर्व्धारणात्तत्रलक्षणाकाच्छद्धमर्यादयाप्रकृतपदार्थद्वयाभेदभानेऽपि न क्षतिः लक्षणावच्छेदकं च तिङन्तत्वरूपमाख्यातत्वम् आख्यातमाख्यातेनेत्यादौ तत्त्वैवाख्यातपदस्य प्रकृत्यवधारणात् भावकालका

भू. सा. द. एकसंख्यास्वतारोर्थाख्यातस्य तत्र भावः प्रधानमिति प्रकृतनिरुक्तभाष्याच्च न हि तिङ्मात्रस्यार्थस्तत्रैव तत्संभावनायेन तत्त्वरतापि स्यात् एतेन तिङः प्रधानभावार्थकत्वप्रतिपादकमेव न तिङन्तस्येति वदन्तः प्रत्युक्ताः लक्षणं तु प्रधान

५ भाववाचकधातुः भावप्रतिपादकत्वम् भावत्वं चात्र निष्पाद्यत्वम् नातः कर्माख्यातस्य फलविशेषकबोधकतावादिमते तत्रातिप्रसंगः तत्र प्रधानप्रतिपादकत्वस्य नाममात्रे भावप्रतिपादकत्वस्य च पक्षे त्यादिना व्यतिप्रसक्तत्वात् हि शिष्टोपादानम् प्राधान्यं प्रधानभावप्रतिपादकत्वरू

चोपस्थितत्वात्त्वं वाचकोत्तरप्रत्ययार्थनिरूपितत्वम् तेन काष्ठैः पाकः स्यादौ पाकादिनाम्नि प्रत्ययार्थकरणनिष्ठप्रकारतानिरूपितविशेष्यतावशात् स्पर्शकेनातिप्रसंगः इतरविशेषणत्वे रूपं तु न तत्र पचति भवतीत्यादिवाक्ये घटकपचता प्राधान्यम्=

५ प्रत्यर्थक्रियायां तत्सत्त्वात् पचतीत्याख्यातेऽव्याप्तेः क्रियार्थविचारेऽस्मिः पूर्वकालाद्यर्थकत्वस्य निराकरिष्यमाणत्वात्तत्क्रान्ते निप्रसंगः पाकस्यादाविव कृदभिहितो भावो द्रव्यवत्प्रकाशत इति भाष्येण तस्य सत्त्वातिदेशात्तस्य सत्त्वसाध्यत्वा

भावादेव नातिप्रसंग इति तन्न सत् यतः साधुत्वान्वाख्यापकव्याकरणस्य स्वाय तत्तदर्थभावे लिङ्संख्याकारकान्वययोग्यत्वभवसिद्धस्मिन्नेव तद्दतिदिश्यते यथा पाकः स्यादौ तत्सर्वभावस्य क्रियार्थस्य तत्र लिङ्संख्यान्वयात् तु भवे

द्रव्यवसत्त्व शतद्विति= नातिदेशविषयत्वासंभवात् क्रियार्थस्य तत्त्वेपि प्रकृत्यर्थस्यासत्त्वरूपतानपायाच्च स्पष्टीभविष्यतिचैतदुपरिष्टात् । एतेन तद्वारणाय क्वचित्क्रियान्तरनिष्ठविशेष्यतानिरूपितविशेषणत्वाभाववत्त्वेन प्रकृतलक्षणघटकक्रियाया विशेष

णान्तभ्येतस्मादावतिव्याप्तिः पचति भवतीत्यादौ पच्यर्थक्रियाया भवत्यर्थविशेषणत्वान्न क्वचिदिति तदसमभिव्याहारे विशेष्यत्वे तु भानादिति केषांचित्कल्पितमनादेयम् । सत्त्वप्रधानानीति । अत्रापि पूर्ववदुद्देश्यविधेयभावकल्पना तस्य

नावच्छेदकचक्रदाधनप्रकृतिकविभक्त्यन्तत्वं नामत्वं प्रकृतिः प्रत्ययो विभक्तिरित्येतन्नाम सत्त्वार्थं लिङ्संख्यावचनामार्थ इति तद्व्याप्यात् क्रियाप्रधानमाख्यातं सत्त्वप्रधानं नाम यतः क्रियाप्रश्नलिङ्गचहेकिं करोति पचतीति द्रव्यप्रश्नः क

नाव हेकेन तोऽवदन्तो यः पाचकः इति प्रश्नसायामिति तस्य तु स्य महाभाष्याच्च तत्र कृते तस्य तदन्तप्रकृतिकसत्त्वनेनास्य क्रियादव्याभिधानेऽपि न केवलेति न्यायेन केवलस्य प्रयोगानर्हत्वात् निरुक्तभाष्यस्य विभक्तिपदस्वारस्याच्च व्युत्पत्तिपक्षमवलम्ब्य वेद

नातो युक्तं तेषामतिप्रसंगः । लक्षणमाह । सत्त्वप्रधानानीति । सत्त्वे लिङ्संख्यान्वययोग्यत्वमुक्तिः सत्त्वप्रधानेयत्रेति विग्रहः लिङ्गादिनिष्ठप्रकारतानिरूपितविशेष्यताशालिस्वार्थकत्वं नामत्वं लक्षणमित्यर्थः विशेष्यार्थकत्वस्य निपातारव्यातादावतिप्रसक्ते

त्वाहलिङ्गेति । व्यक्तिबोधस्य जातिविषयकत्वनियमे नजातिप्रकारतानिरूपितत्वस्यातिप्रसंगवारकत्वात्तदनुपादानम् । यद्यपि चस्त्वेवं लक्षणं घटत्वादिनासर्वनामपरामर्शयोग्यत्वमपि द्रव्यलक्षणमुक्तम् तथापि निरुक्तभाष्यपर्यालोचनया त

सत्त्वप्रधानानि नामानीति निरुक्तात्द्रव्यादिसत्त्वादेः क्रियाप्राधान्यबोधकभाष्याच्चप्रधानत्वर्थभावनाप्राधान्यमध्यवसीयते ॥ याद्दच्छिके ॥ ॥

ताहशाद्व्यन्त्वादितंलक्षणं निरुक्ताभिप्रेतमित्यवगन्तव्यं तथाख्यातलक्षणस्यापि तावच्छेदकानाक्रान्तेपु यादृच्छिकेष्वतिप्रसंगस्तत्र तद्व्यतिरिक्तत्वविशेषणेनैव परिहरणीयः तत्र नामत्वव्यवहारस्तु स्याद्यन्तत्वनिबन्धनो भाक्त इति तद्भावः उपसर्गादिल

तत्त्वबद्ध्यते । भावादीति । इत्यंहि तत्र भाष्यम् का तर्हि यवाचोयुक्तिः पचति भवति त्वं पचसि भवसि त्वं पचसि भवतीति सैवैषा वाचोयुक्तिः पचादिक्रिया भवतिक्रियायाः कर्त्री भवन्तीति तेन चाहत्य पचाद्यर्थक्रियाणां कर्तृत्वेन भवनादिक्रियाया

विशेषणत्वं प्रतिपाद्यते धात्वर्थक्रियायामाख्यातार्थविशेषणत्वाभ्युपगमे तस्य स्वकर्त्रैव रूढत्वेन तयोः पदार्थान्तरे विशेषणतयान्वये नैराकाङ्क्ष्येण भवत्यर्थक्रियायामाख्यातार्थविशेषणपच्याद्विक्रियाणां कर्तृत्वेनान्वयासंभवेन तत्र हि रोधोऽप्र

तिरोधप्रवृत्त्यादिति भावः । सत्त्राद्यविषयादित्याप्रशंसायामित्यादिसत्त्वयरिग्रहः नतु भावप्रधानमित्यनेन तिङन्ते भावनापरपर्याय भावप्राधान्यं प्रतिपाद्यते सा च नैयायिकनये कर्त्राख्याते कर्तृत्वकृतिः कर्माख्याते कर्मत्वं फलेतन्निरूपित

प्रयत्नत्वात्तेः संख्याकालातिरिक्ताख्यातार्थस्य भावनात्वोपगमात् भाकाख्याते तु भावयत्वानुवारकत्वादाख्यातस्य प्राधान्यं च तस्याः स्वप्रकृत्यर्थापेक्षमानप्रत्ययोपात्तत्वप्रत्यासत्त्यालडाद्यर्थकालान्वयोपगमेऽत्र तदपेक्षमपि उक्त

भाष्येपि क्रियापदार्थस्तस्मन्तभावनैव अत एव क्रियाप्रश्नलिङ्गचहेत्वेवोक्तं न त्वति उन्नेनेति हत्यादिरूपभावनायामाख्यातार्थत्वेमानेन भू वादिस्तत्रस्य कथं जायते यं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति प्रदर्शके न्वयव्यतिरेकाभ्यां शक्तिग्राहक

मिहपचतीत्यत्र केकश्चिच्छब्दः श्रूयते पचशब्दस्य कारान्तो निश्चप्रत्ययः अर्थोपिकश्चिद्गम्यते विक्लित्तिः कर्तृत्वमेकत्वं एवतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी पच्छब्दो हीयते पठशब्द उपजायते तिशब्दस्त्वन्वयी अर्थोपिक

श्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वमेकत्वं वान्वयीति तेन मन्यामहे यः शब्दो हीयते तस्यासावर्थो योऽर्थो हीयते यः शब्द उपजायते तस्यासावर्थो योऽर्थ उपजायते यः शब्दोऽन्वयी तस्यासावर्थो योऽर्थोऽन्वयीति

भाष्यम् तत्रातः प्रत्ययत्वस्यैकैश्चिम्बौचार्यैः कल्पनादति प्रत्ययस्यैतदुक्तमितिकेचित् पच्यते पठ्यतइत्यादावप्याकान्वयव्यतिरेकोऽनेन कर्मत्वस्याप्याख्यातार्थत्वं तत्रैवावधार्यते तथा चाख्यातार्थविशेषकबोधेनोक्तभाष्यप्रातिकूल्यम् । वस्तुतस्तु भा

वप्रधानमाख्यातमितिनिरुक्तेऽत्र द्वाभ्यस्वरसात्कालकारकसंख्याविशिष्टभावनाप्राधान्यर्थमाश्रित्य तएव नामलक्षणनिर्वचनेन कारकस्य नामार्थत्वे नोक्ते च नस्य धात्वलभ्यतेन नामार्थत्वासंभवात् संबोधनस्यापि क्रियान्वयित्वात्तदपि कारकत्व

त्वोपदेशात्त्वमेव संबन्धस्य क्रियानन्वयित्वात्त्वमात्रं प्रत्येष प्रत्ययार्थ इति तदाशयः न च क्रियायाहृपप्रकृत्यस्य भाष्यप्रामाण्यादेकत्वसत्त्वेपि दित्वादिसत्त्वे प्रमाणाभावात् कथं तन्मते तोक्तिसंभव इति वाच्यम् परेति स्मादिनावक्ष्यमाणरीत्या कारकगतायास्तस्यास्त

आरोपसंभवात् लडादीनामेकवचनादीनां च कालसंख्याद्योतकत्वस्य सर्वैरेवोपगमात्कारकस्यापि द्योत्यत्वमेव तस्मिन्प्रत्ययार्थत्वोपगमे पाचकः पक्तेत्यादाविव पचतिपच्यत इत्यादावपि प्राधान्यापत्तेः जात्यतिरिक्तपदार्थस्य विशेषणताया द्योत्यत्वस्यैव क्रियायां

सुतरामेव: प्रजयतीत्यादेः द्योतकता: पचन्यादौ नामत्वे: द्रव्यस्य

तत्रत्वात् अत एव स्त्रियामिति सूत्रे भाष्ये प्राधान्यापत्तिर्मृग्यालिङ्गस्य वाच्यतापक्षे उक्ता । वाच्यस्यापि प्रकृत्यर्थविशेषणत्वेन तदसंगतिः स्यादेव तत्र कर्तृकर्मणोर्लिङ्गद्योतकत्वस्यैव विहितत्वाद्विभक्तिषु अन्येषां कारकाणां तु यथायथं समभिव्याहृतपद
यतानिर्वाहकोव्यापारोऽभिधीयते नाशयतीत्यादौ नाशप्रतियोगितानिर्वाहकोयथायथं बोध्यः निर्वाहकत्वं च स्वरूपसंबन्धविशेषो नाशो न नाशयतीत्यादावनन्वयापत्तिः एवं च पाकादिकर्तृत्वकर्मत्वविरहेपि णिचप्रत्ययार्थप्रतिपाद्यतावच्छेदककर्तृत्व
स्य फलत्वेन तदाश्रयत्वात्पाकादिकर्तुः कर्मत्वम् तादृशकर्तृत्वविशेषणतयासत्त्वाद्यादिरूपस्य तत्कर्तृत्वमित्त्वविवक्षायां पाचयत्योदनं सूदमित्यादिप्रयोगाग्रपि साधवः अतएव चाजियरुत्तंजनकोयनुसन्दितिमहिप्रयोगः स्वरसतः संगच्छते ।
गत्यर्थानां तु कर्तृत्वविशेषणविवक्षायां गत्यर्थकर्तुः कर्मत्वं न केवलं आश्रयत्वेन गत्यर्थगति वृद्धीत्यादि सूत्रं तु गमयत्यादियोगे तादृशकर्तृत्वविशेषणतया सत्त्वे तत्कर्तुरित्यस्यविवक्षानियतानामातिप्रर्थबोधनद्वारा तत्र कर्तृप्रत्ययासाधुत्वज्ञापकतेन पाचयत्योदनं सूदायेनेति वृद्धजयानु
मंगमयतीतिनप्रयोगः एवंचाजांग्राममगमयतीत्यत्र ग्रामनिष्ठसंयोगानुकूलव्यापारस्य यदजानिष्ठमाश्रयत्वरूपं कर्तृत्वं निर्वाहकत्वसंबन्धेन तद्विशिष्टो यो व्यापारस्तदनुकूलकृतिमानिति बोधः पाचयत्योदनं सूदायेनेत्यत्र तु सूदयकर्तृकोयोदि २

क्रियत्वानुकूलो व्यापारो निर्वाहकत्वसंबन्धेन तत्कर्तृत्वविशिष्टव्यापारानुकूलकृतिमानिति बोधः। चैत्रेण ग्रामं गम्यते इत्यत्र तु तादृशव्यापारनिर्वाहककर्तृतानिरूपकत्वादृशधात्वर्थः कर्मात्मनेपदोपस्थितकर्तृत्वेति संयोगरूपफले वहिन्नी
यं तात्पर्यं ग्राम हन्ति त्वा न्वयः। एवं च चैत्रकर्तृकव्यापारनिर्वाहककर्तृत्वनिरूपकं यद्ग्रामवृत्तिसंयोगावच्छिन्नं गमनं तत्कर्म जन्मेति बोधः। सत्रेण पाच्यते तण्डुलः चैत्रेणात्र तु चैत्रकर्तृकप्रेरणानिर्वाह्यो यः सहायकर्तृत्वनिरूपकः पाक
त्वविक्लित्ति शालीनं तण्डुल इति बोधो ऽर्थविवेकः स्वयमूह्यः। येन तु कूलत्वं व्यापारे एव लिङ्गजर्यत्वादन्वयिनी गमनादिक्रिये बधात्वर्थतावच्छेदकं फलं तत्कृतिलिङ्यजादीनां प्राप्तमेव कर्मत्वं गनिरूढ इति सूत्रेण नियमनं तु जितेनामनेपा
वयत्वादन्तं सत्ययेनेत्यादौ द्वितीयातृतीययोर्नियामकाभावाधिकमन्यत्रानुसंधेयमित्याहुः। अथ व्यापाराद्युपसर्गपीडादि यातिविस्तिन कर्मद्वितीयायां प्रथमाश्रयत्वार्थः। यद्यपि वेङ् एठ मधिति एनीत्यादौ निरवच्छिन्नसंयोगादिरूपफलानुकूलव्यापा
रे यातिक्रिमुपगम्य वेङ्कवादीनां कर्मत्वं कर्तुरीप्सिततममित्यनेन तस्य पादनुप्राप्तिमुख्यार्थपरतायामपि तत्प्रयोगे कर्मप्रत्ययप्राधुर्व्यवबोधनार्थमपिशीङादिसूत्रप्रणयनमिति बोध्यम्। कर्मप्रवचनीययोगे विहिता द्वितीयादिविभक्तेस्तु लक्ष्यलक्षणभावादिः
संबन्धो ऽर्थस्तत्त्वतसे अपदविभक्तीनां तु सर्वासां संबन्ध एवार्थस्तावच्छेदकवत्वात्। कालाध्वनोरत्यन्तसंयोग इति विहिता द्वितीयाया व्यापकत्वमर्थः। मासमधीते इत्यादौ मासव्यापकमध्ययनमिति बोधात्। न चैवं द्वितीयादीनामर्थयोरेव
क्रि विरोधस्तस्याः कारकविभक्तिपरत्वादित्यन्यत्र विस्तरः। क्रमप्राप्तं तृतीयार्थं निरूपयति कर्तृत्वं तृतीयाया इति। करणत्वं तृतीयाया व्यापारार्थकत्वस्याविवक्षया ऽन्वा द्रुक्तकर्त्रीति आश्रयार्थकत्वे मानमुपन्यस्यति तथा हीत्यादिना ननु स्वातन्त्र्यमि
त्यव्यापारानधीनव्यापारत्वं तच्च काष्ठैः पचतीत्यादौ काष्ठादावप्रसक्तं तद्व्यापारस्य चेतनव्यापाराधीनत्वादत आह। स्वातन्त्र्यं चेति। व्यापाराश्रयत्वमात्रस्य करणे धात्वर्थाश्रयत्वस्य कर्मण्यपि प्रसक्तत्वात् तद्व्यावृत्तये उक्तमेत्याभिधेयं। केचित्तु कर्तृप्रत्ययसमभि
व्याहारे व्यापारतावच्छेदकसंबन्धेन धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतानाश्रयत्वं तादृशधात्वर्थाश्रयत्वं स्वातन्त्र्यं तदेव च कर्तृत्वं। कालिकसंबन्धेन व्यापाराश्रये ऽतिप्रसंगवारणाय व्यापारतावच्छेदकसंबन्धेनेति। ग्रामं गच्छतीत्यादौ ग्रामसंयोगादे
फले तादृशधात्वर्थत्वाभावान्न तदाश्रये कर्मण्यतिप्रसंगः। एकस्तण्डुलो देवदत्तेन त्यजते फलस्य विशेष्यत्वेन देवदत्ते व्याप्तिपरिहाराय कर्तृप्रत्ययसमभिव्याहार इति सामग्रीसाध्यायां क्रियायां सर्वेषां तत्तद्व्यापारे स्वातन्त्र्येण उक्तस्य तत्रास्य युगपत्सर्वेषा
भावान्न स्वातन्त्र्यं कल्प्यमिति तन्न कर्मप्रत्ययसमभिव्याहृतधात्वर्थकर्तृसाधारण्यानुगतस्यातिव्याप्त्यानिरुक्तेः गौरवाच्च धात्वर्थफलस्य व्यापारतावच्छेदकसंबन्धेन ग्रामादौ बाधेनैव तन्निप्रसक्तेः नाश्रयान्तविशेषणवैयर्थ्यापत्तेश्चापेक्ष्य कर्मकर्तृत्वातिनयमते
फलव्यापारत्वापेक्षायाः व्यापारत्वेन कृतेरपि संग्रहान्न तदनाश्रये चेतने स्वतन्त्रः कर्तृव्यवहारः तदतिरिक्तव्यापारस्य तानाविवक्षायां तु कृचिकर्तृत्वव्यवहारो ऽपि अत एव तन्नियदा यदीयो व्यापार इति मत्वेभ्रमं तेन तु मयानूनमिति।
त्वहस्यात्मकव्यापारस्याविधात्वर्थत्वानुपपन्नमिति भावः। स्थालीकरिस्यं मतिमाह। धात्वोक्तक्रियेइति। उक्तक्रियाइत्युक्तं स्वातन्त्र्यमेव तत्संमतत्वं न्यायादेशमिति भावः। अत एवेति उक्तस्यातन्त्र्यस्य कर्तृत्वादेवेत्यर्थः। कृत्याश्रयत्वादेत्येदि
तादृशप्रयोगानुपपत्तिरिति भावः। उक्तविवक्षाया एव व्यवहारहेतुत्वं द्रढयितुमाह। नत्वेवमिति। एवं विवक्षाया एव व्यवहारहेतुत्वे जीवत्वे इति। मनोमयः प्राणशरीर इति पदद्वयं जीवस्यैव ग्रहणे हेतुरित्यर्थः। एतन्निमित्यादि। अस्य इतः शारी
कर्तृत्वतृतीयाया आश्रयोऽर्थः। तथाहि स्वतन्त्रः कर्ता स्वातन्त्र्यं च धात्वपात्तव्यापाराश्रयत्वम्। धात्वोक्तक्रियेनित्यं कारके कर्तृतेष्यत इति वाक्यपदीयात्। अत एव यथा यदीयो व्यापारो धातुनाभिधीयते तदा स कर्तेति स्थाली पचत्यग्निः पचति तं
ण्डुलाः पचन्ते स्वयमेवेत्यादि संगच्छते नत्वेवं कर्तृकर्मव्यपदेशादिति सूत्रे इमे मनोमयः प्राणशरीर इति वाक्यस्य मनोमयस्य जीवत्वे एतमितः प्रेत्याभिसंभवितास्मीति प्राप्तिकर्मत्वकर्तृत्वयोर्व्यपदेशो विरुद्ध इति भगवता व्यासेन निरस्तमिति कथं
संगच्छताम्। उच्यते जीवस्यैवहेयत्वे प्राप्तिकर्मत्वमपि वाच्यं कर्तृत्वं तत्त्वातेनोक्तम् तच्चैकदेकस्य संज्ञाद्वययुक्तं कर्तृसंज्ञया कर्मसंज्ञाया बाधात् तथा चैतन्मिति द्वितीयार्थस्याकर्मकर्तृतायाश्च प्राप्यापत्तिरिति शब्दविरोधहेतोर्भवति
रान्येय पते द्वीक्रयणविशिष्टमात्मानं अभिसंभवितास्मि
समेधदेस्तेरिति एवं च व्यापाराश्रयत्वमत्राश्रयमात्रं तृतीयार्थः कृत्याश्रयत्वे कारकत्वक्रमप्रयोक्तृत्वं वाहेटादावव्याप्तम् तिपन्नास्मीत्यर्थः। कथं संगच्छतामिति। वैवतिकयोः क
र्कर्मत्वयोरेकस्मिन्नपि संभवादिति भावः। संज्ञानिबंधनविरोधं समर्थयन्वास्तवकर्मत्वकर्तृत्वविरोधं परिहरति। उच्यत इत्यादिना जीवस्यैवहेयत्वे इति। सक्ति तत्त्वकवीनेत्यनेन जीवस्यैवोपास्यत्वं बोधन इत्यर्थः। प्राप्तिकर्मत्वमिति। उपासनाविष
यत्वरूपमित्यर्थः। आख्यातेनेति। अभिसंभवितास्मीति लुडाख्यातेन प्राप्तिकर्तृत्वमुक्तमित्यर्थः। बाधादिति। संज्ञयोरकडारीयत्वेन संज्ञाद्वयसमावेशासंभवेन परया कर्तृसंज्ञया बाधादित्यर्थः। शब्दविरोधहेतारा। एकदा संज्ञाद्वयप्रयुक्तका
र्यानुत्पत्तिरित्यर्थः। सः संज्ञाद्वयविरोधः भेदहेतुः नतु कर्तृकर्मत्वव्यवहारभेदहेतुरित्यर्थः। न तु कर्तृत्वकर्मत्वयोः पारमार्थिकविरोधमादायेति भावः। न तु तावता धात्वर्थव्यापाराश्रयस्य तृतीयार्थत्वमायातेनाश्रयमात्रस्येत्यत आह। एवं चेति
धात्वर्थव्यापाराश्रयस्य कर्तृत्वे चेत्यर्थः। आश्रयमात्रमिति। अनन्यलभ्यत्वादिति भावः। अव्याप्तमिति। अचेतनत्वेन तत्र सिं कृत संभवादिति भावः। परे तु देवदत्तादिनिष्ठव्यापारस्य धात्वर्थत्वविवक्षया भवदुक्तस्वातन्त्र्यवहास्तव कारकचक्रप्रयोक्तृ
त्वादिरूपकर्तृत्वस्य दंडादावभावेपि तदारोपादेव कर्तृत्वव्यवहारः अत एव काष्ठैः स्थाली पचतीत्यादौ स्थाल्येव कारकसंचप्रयोक्तृत्वेन विवक्षिता प्राशयेन प्रधानेन समवायेस्थाली परतंत्राव्यवाये स्वतंत्रा किं पुनः प्रधाने कर्ता कथं तायते कर्मप्रधा
नमिति यस्तत्र्वैभाष्यात् त्रिद्वितेषु कर्तृत्वश्रवणं पितामवतीति कारकस्तत्रे भाष्ये उक्तम्। रूपिणामपि। प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि तदधीनप्रवृत्तित्वात्प्रवृत्तानां निवर्तनात्। अदृष्टत्वात्प्रतिनिधिवैविशेष्ये च दृष्टेनात। आरादप्युपकारित्वे स्वातन्त्र्यं कर्तु
रिष्यते इत्यनेन करणादिव्यापारानुकूलकरणादिसाधकत्वस्याक्रिमत्वेन करणादीनामात्माधीनत्वसंपादनेन तत्तद्यन्नव्यापारस्यैवानतिप्रहत्नानां तेषां निवर्तनेन च कर्तुः फलप्रदृश्यरूप एव निरूढ्या प्रतिनिधिभावेन कारकांतराभावे ऽप्युत्पत्त्या देवकर्तृ
त्वेनेनच अदृष्टपुपकारित्वे स्वातन्त्र्यमित्यर्थकेन कारकचक्रप्रयोक्तृत्वमेव स्वातन्त्र्यमभिहितम्। तस्य तत्पर्यायधर्मीत्यादभावेपि शास्त्रेन यस्यैते प्रतिपद्यते सकर्तेतिन्द्रावः पाचयति चैत्रेण मैत्र इत्यादौ प्रयोज्यस्य प्रयोजकव्यापाराधीनत्वे ऽपि साधनान्तर
विषये उक्तस्वातन्त्र्यसत्वात्कर्तृत्वमव्याहतं धात्वर्थक्रियाकत्वस्वातंत्र्यस्यैव विवक्षणात् कर्तृपरतंत्रकरणादेस्तु तस्वव्यापारमात्रायकर्तृत्वं प्रयोज्यस्य स्वार्थसिद्ध्यर्थमपि प्रवृत्त्या करणादीनां कर्त्रधीनत्ववत्सायो ज्यस्य प्रयोजकाधीनत्वाभावाच्च न
द्विपालो द्रष्टाधीनकरणादीनां व्यापारवत्त्वा प्रयोज्यस्य तादृशप्रहेन्नो तु सर्वे इमे स्म कृत्यर्थप्रवर्तन्त इति हेतुमति चेति सूत्रस्थं भाष्यमत्र भवच्छसार्वजनीनः प्रमाणमित्याहुः। तत्राश्रयत्वं दंडादावव्याप्तमिति वदता नैयायिकोक्तकर्तृत्वस्यान्यतस्
त्वकृत्व संविन्तमाख्यातार्थकृत्याश्रयत्वस्य चैत्रेण पाचयति मैत्र इत्यादौ चैत्रादावव्याप्तेश्चेति। नैयायिकानां। कर्तृतृतीयायाः कर्तृत्वं मतभेदेन कृतिजन्यत्वरूपं सकर्तृकत्वं वार्थः। न च भावकर्माख्यातस्थले चैत्रेण शय्यते पच्यते इत्यादौ क्रिया
विशेषणतया तृतीयया प्रतिपाद्यते अचेतनकाष्ठादेरपि कर्तृत्वविवक्षायां काष्ठं पचतीतिवत्काष्ठेन पच्यते इति प्रयोगः व्यापारस्वरूपे कर्तृत्वे तज्जन्यत्वरूपे सकर्तृकत्वे वा तृतीयायाः लक्षणा एवं चैत्रेण ज्ञायत इत्यादावाश्रयत्वरूपे कर्तृत्वे आधेयत्वरूपे कर्तृ
मत्वे न शृणुते घटेनेत्यादौ प्रतियोगित्वात्मककर्तृत्वे अनुयोगित्वरूपकर्तृमत्वे वा लक्षणा चैत्रः पचतीत्यादौ तत्कर्तृरूपकर्तृत्वं यथायथं तत्र तत्र कर्त्राख्यातेन क्रियाविशेषणतया बोध्यते कर्तृपदसमभिव्याहारे भाक्तमेव न तत्र स्वरसतः कर्तृपदप्रयोगात् न च यत्नवत

न्या॰ सा॰ द॰
२८
21

पवमस्त्वपकर्तृत्वेऽकर्तृकरणयोस्तृतीयेत्यत्रोपात्तकर्तृपदस्य मुख्यार्थमाश्रित्य भावादचेतनकाष्ठादिवाचकपदोत्तरं तृतीयानुपपत्तिरिति शंक्यम् सूत्रस्थकर्तृपदस्य पारिभाषिककर्तृपरत्वात् तत्त्वं तु यथा स्वेनवत्वं हि मानत्वात् स्वत्रैतल्लब्धं समभिव्याहृत
कारकांतरानधीनत्वेसति कारकत्वं पुरुषव्यापाराधीनक्रियानुकूलव्यापारवत्त्वमेव काष्ठादीनामस्त्यनधीनत्वविवक्षया काष्ठं पचतीत्यादि कर्तृत्वं अनधीनत्वं तु विशेषणं चैत्रः काष्ठैः स्थाल्यां पचतीत्यत्र चैत्रः काष्ठानि स्थाली पचतीति प्रयोगवारणा
य चैत्रः पचति स्थाली पचतीत्यादौ यत्र समभिव्याहृतकारकाप्रसिद्धिस्तत्र तथीनांते विशेषणं न प्रतीयत एव तन्निर्वाहस्थलकारसास्वतंत्रशक्तिकल्पनात् विशिष्य प्राक् विशेषणे विषयकविशेष्यबोधाजनकत्वादुक्तेश स्यानिर्वाहात् चैत्रेण पाच
यतीत्यादौ हेतुकर्तृसमभिव्याहारे प्रयोज्यव्यापारस्य समभिव्याहृतहेतुकर्तृव्यापाराधीनत्वेऽपि णिजन्तप्रतिपाद्यपाचनादिक्रियाया मेव प्रयोजकस्य कारकतया प्रयोज्यव्यापारस्य पच्यादिक्रियाकारकव्यापारानधीनतया अस्ततत्वेन तदुक्तरूपत्वे
त्तरं तृतीयानुपपत्तिः स्वतंत्रकर्तृप्रयुक्तं ज्ञानं व्यापारस्य तंडुलादिक्रयणवत् पाकादावस्य पासिद्धत्वात् कारणत्वेन तस्य पाकादिप्रयोजकव्यापारवत्त्वेऽपि तत्क्रियापाकारकत्वाभावाच्च अत एव चैत्रेण मैत्रः पाचयतीत्यादौ मैत्रः पचतीति नत्वस्तपद
र्शितरीत्या चैत्रेण मैत्रः पाचयतीत्यादौ चैत्रादेः स्वतंत्रकर्तृत्वानिर्वाहस्थापि तत्पदोत्तरं तृतीयानुपपत्तिः तदर्थकर्तृत्वस्याणिच्चाभिधानात् भवन्मते कर्तृत्वनिर्वाहकव्यापारस्यैव तदर्थत्वात् कर्तृत्वस्य च स्वतंत्रनिष्ठत्वाद्विवेचन कर्तृत्वनिर्वाहकत
संबन्धेनपाकाद्यन्वितहेतुकर्तृव्यापारस्य णिजर्थतापक्षे स्वतंत्रकर्तृत्वस्य तेनानभिधानात् कर्तृतद्रूपफलावच्छिन्नव्यापारस्य णिजर्थतामतेऽप्याश्रयोपस्य तस्य तेनाभानानिर्वाहे कर्तृत्वानभिधानात्तृतीयोपपत्तेः अवोधनस्यैव तत्रानभिधानप
दार्थत्वात् अनभिधानस्य तिङ्कृत्तद्धितसमासैरिति परिगणनाच्च आख्यातस्य धर्मवाचकत्वेऽपि कृत्तादिविशिष्टकर्तृबोधकत्वरूपाभिधानेस्यात्तत्वाच्च न चैत्रः पचतीत्यादौ तृतीयापत्तिः मुख्ये विशेष्यतया नछिन्नत्वाद्वै चैत्रेण पचतीत्यादिप्रयोग
पत्तिरित्यपि न आश्रयातिरिक्तांशे विशेषणत्वेन यत्किंचिद्बोधनस्यैव कृत्यभिधानपदार्थत्वात् तथाभिधाने च लकृत्तद्धितसमासैरेवैतत्तल्लिंगवाभिधायकतया वृत्तिकृतोपात्ताः यद्यपि स्वतंत्रव्यापारस्वतंत्रतृतीयादेरनुशासनं तथापि लाघवात्कृति
पकर्तृत्वपवत्तृतीयादेः शक्तिः अचेतनव्यापारादौ तु निरूढलक्षणैव अनुशासनस्य तात्पर्यमात्रग्राहकत्वात् लाघवस्य कृत्वस्यैव शक्तिकल्पकत्वात् व्यापारे तत्सत्त्वेऽपि गौरवेण न तत्सिद्धेः एवं च कृतिरूपकर्तृत्वबोधस्थले कामकृतत्वर
व्यापारानधीनत्वं न प्रतीयत एवेति न तदंतर्भावे लक्षणाशक्तिः प्रमाणाभावात् व्यापारत्वात्तत्स्वकर्तृप्रयोगेन लक्षणया तदंतर्भावेन व्यापारबोधश्चाधेयमर्ता क्रान्तिप्रसंगस्य वारणात् इत्यपास्तं तदंतर्भावेण कृतीशक्त्यावृत्तिरवेतिकास्तिप्रसंगस्य दुर्वारत्वा
त् तदो जायत इत्यादौ सिद्ध्यतीत्यादौ वरादेः कारकत्वं कर्तृत्वं च स कार्यमवश्यमेवोपपादनीयम् स कार्यत्वाद्विदेदिविधिरसिद्धस्य तस्य कारकतया वक्तुमशक्यत्वात् कृत्वं च क्रियाकर्तृत्वं गतद्वरानुकूलकृतिमात्रम् एकक्रियाविषयकत्वेऽपि
नान्तरीयकक्रियानिर्वाहस्थलकृतिमतस्तत्क्रियाकर्तृत्वाद्यपदेशात् अतएव मत्रोऽयं तेन मयाकृतमिति वा प्रयोगः किंतु तत्क्रियाविषयत्वे सति तदनुकूलकृतिमत्कर्तृत्वम् एकतरभावेनोक्तत्वाद्येन यत्क्रियायाश्च निषिद्धत्वं दनु कृ अनभिसंहितत्व=
लत्वस्य कृतमभावादेव नातिप्रसंगः अयोद्देशेन नाराचलोपाद्यत्र ब्राह्मणवधस्तत्र मरणानुकूलनाराचत्वेपरस्य व्यापारस्य कृतिविषयत्वेऽपि हिंसालक्षणस्योद्देश्यतावरितया तस्य विप्रमरणानुकूलव्यापारत्वेनाभिसंहितत्वान्नेत्ररूपेण कृतिविषयत्वस्य

अयं च त्रिविधः अनुद्देश्यो हेतुः कर्मकर्ता चेति मया सेव्यते हरिः काष्ठेन हरिण्णं गमयति कृष्णं गोकुलं गोपः मत्कृतिनाश्रयकहरिकर्मकसेवनानुकूलो व्यापारः हर्षभिन्नाश्रयकगमनानुकूलो व्यापारः गोकुलकर्मकगमनानुकूलः
कृष्णाश्रयकव्यापारस्तदनुकूलव्यापारश्चेति क्रमेण बोधः करणत्वं तृतीयायास्तदाश्रयव्यापारो तथाहि साधकतमं करणं तमवर्थः प्रकर्षः सच्चाव्यवधानेन फलजनकव्यापारवत्ता तादृशव्यापारवत्त्वात्करणं च करणं उक्तं च वाक्यपदीये।
क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् वस्तुतस्तदनिर्देश्यं नहि वस्तुव्यवस्थितम् स्थाल्या पच्यत इत्येषा विवक्षा दृश्यते यतः इति विवक्षातस्तस्य करणत्वे तदभावात् द्वितीयासप्तम्यादेरवकाशः

तादृशव्यापारेस्वत्वेननववास्तवविशिष्टं वपकर्तृत्वं तादृशव्यापारकर्तृरिति न तस्य संपूर्णप्रायश्चित्तमित्याहुः कृतेरपि व्यापारतया यथातलम्प्रत्वात्तत्र तृतीयाशंकोमानाभावात् तिभक्तोलत्त्वेनायाश्रये खंडनीयत्वाच्चैत्रेण ज्ञायत इत्यादिप्रयोगाच्च
रूपपादनात्रेदं समत्तेसध्रीचीनमिति वदन्ति । कर्तृविभागमाह । अयंचेति अनुपदं तृतीयार्थत्वेनोक्तः कर्त्रर्थः अयमिति प्रेरणार्थकणिजप्रकृतिधातूपात्तव्यापाराश्रय इत्यर्थः । हेतुरिति । णिजर्थप्रेरणाश्रय इत्यर्थः । कर्मकर्त्रेति । धातूप
स्थापत्यव्यापाराश्रयत्वे सति णिजर्थव्यापारेणाप्यमानत्वेन विवक्षित इत्यर्थः क्रमेणोदाहरणमाह । मया सेव्यत इत्यादिना । अत्र व्यापारविशेषकबोधोत्कीर्तनं तत्केपदाद्यनुसारेण तत्तं तत्प्रागेवावोचाम तृतीयार्थं निरूपयति । आश्रयव्यापार
विति । ननु व्यापारस्यैवात्रवलाभात्तत्र शक्तिकल्पनमपार्थकमित्याशंक्यैकस्य कर्तृनिष्ठव्यापारस्य धात्वोलाभेऽप्यनुभूयमानस्य करणनिष्ठव्यापारस्य पदार्थत्वमंतरेण याहृ विषयतानुपपत्त्या शक्तिरावश्यकी धात्वर्थतावन्न तस्य तथासति धात्वा
पात्तव्यापाराश्रयत्वात्मकस्याने आत्कर्तृत्वापत्त्या करणव्यपदेशोच्छेदापत्तिः किंच निरवकाशया करणसंज्ञया वाधेन स्यात्तंमविवक्षायादेशः करोतीत्यादिप्रयोगानापत्तिरित्याशयेन स्वोक्तार्थस्य सप्रमाणतां दर्शयितुं व्यापारघटितकरणलक्षणप्रति
पादकं सूत्रमुपन्यस्यति । तथाहीत्यादिना साधकतममिति । सूत्रस्य कारकाधिकारीयत्वादुपात्तसाधकशब्दादेव तमवर्थप्रकर्षलाभेऽपि तीरादिगौलभ्यधारेविम्मुपपत्तिफलकस्य कारकप्रकरणोक्तसामर्थ्यगम्यः प्रकर्षो नाश्रीयत इत्यर्थः
वोधनाय तमग्रहणमुपात्तमिति सूचयन्नाह । तमवर्थः प्रकर्ष इति । प्रकर्षश्च कारकांतरापेक्षो न करणान्तरापेक्षः कारकसामान्यवाचिसाधकशब्दसमभिव्याहृतेन तमपा तत्तत्कारकप्रकर्षबोधनादनपवादस्येतदीयिकयावजतीतिप्रयोगोपपत्तिः अन्यथा करणान्त
आष्ठाहरो रापेक्षिकप्रकर्षस्य तत्राभावेन तदनुपपत्तेः । तादृशेति । फलाव्यवहितपूर्ववृत्तिव्यापाराश्रय इत्यर्थः । करणमिति । एतेन फलायोगव्यवच्छिन्नं कारणं करणमिति लक्षणमपास्तं भवति स्वेतरयावत्कारणसमवधाने सति यद्व्यवहितोत्तरत्वलफलनिष्पत्ति
स्तत्त्वमिति यावत् तत्र निवेशादंपकारेच्छद्दृष्टादेरपि फलायोगात्तत्र प्रसंगः प्रयोजकेति व्याप्तिनिराससाधाव्यवहितेति अर्कार्य्यहरिसंमतिमप्याह । उक्तंचेति । क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् वालेन हस्तरस्त्रवाणव्यापारावव्यवहितो
त्तरवलेप्राणवियोगरूपफलावाप्त्यभावाल्लक्षणसमन्वयः विवक्ष्यत इत्यनेन न विवक्षैव विभक्तौ प्रयोजिका न वास्तवं करणत्वादि सत्ते सुक्तं भवति अत एव दात्रेणनादरेण वलस्य तत्त्वविवक्षया वलेन लुनातीति प्रयोगः । वस्तुत इति । यत इदमेव वस्तुक
रणमिति नानियमो तत एव वृनिष्ठितादिकरणत्वापि स्थालीतत्तत्तरकपालत्वादनुभवति वैवक्षिकं करणत्वमित्यर्थः । अवकाशमिति । तंडुलं पचति स्थाल्यां पचतीत्यादौ करणत्वाविवक्षायां तत्संज्ञाप्रयुक्तद्वितीयादेरवकाशमित्यर्थः तथा च प्रकृते का
ष्ठैः पचतीत्यादौ प्रकृत्यर्थकाष्ठादेरभेदेनाश्रयस्त्व तृतीयार्थेऽन्वयः तत्स्वाश्रयत्वेन विशेषणसमानाधिकरणयोः प्रयासस्त्वव्यापारजपतत्वयन्तरे आधेयतासंबंधेन फलोपहिततादृशव्यापारस्य चानुकूलतासंबंधेन विक्लित्त्यनुकूले धात्वर्थव्यापारे।
एवं च काष्ठाभिन्नाश्रयको यः फलोपहितव्यापारस्तत्प्रयोज्या विक्लित्त्यनुकूलोऽयकाश्रयको वर्तमानो व्यापार इति बोधः अत्र व्वकारकर इति सूत्रस्थं यत्सन्निहिते तेषु सर्वेषु कारकेषु कर्तृत्वसर्वेषिता भवतीति सकलकारकव्यापारस्य तत्तदधीनत्वप्रतिपादकं
भाष्यंमानम् । अपरे तु क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरमिति कारिकायां स्वातंत्र्यात्तृतीयार्थस्य जन्यतासंबन्धेन फलेऽन्वयः तथा च जन्यतासंबन्धेन काष्ठाश्रयकव्यापारविशिष्टविक्लित्त्यनुकूलो व्यापार इति बोधस्ताद्धः तृतीया २१

धिकरणत्वस्य व्यापारद्वारकत्वात् शक्तिस्वभावात् नफलांशे । अतएवोद्भिदा यजेतेत्यादौ मत्वर्थलक्षणया नामधेयत्वसिद्धान्तः । अत्र व्यापारांशे प्रतिकरणत्वेनान्विते फलांशे करणत्वेनान्वयोपपत्तौ लक्षणाया अप्रसंगात् । अतः सोमेन यजेतेत्यत्र मत्वर्थ-
लक्षणेति मीमांसका इत्याहुः । वस्तुतस्त्वाश्रयो वधिरित्येतद्भूतिमत्त्वस्य करणत्वं तृतीयार्थः आश्रयमात्रमर्थः तस्य स्वनिष्ठव्यापारजनकत्वेनान्यथा तदर्थव्यापारेऽन्वय इत्येव कृत्वायः । नैयायिकास्तु साधारणं कारणं करणं कारणं साधारणत्वं च व्यापारवत्त्व-
मेव तत्फलायोगव्यवच्छिन्नत्वम् तस्य यावत्कारणं हरितेन यागो रेवणन स्वर्गो वाच्छिन्नेशक्यसिद्धेः सपकत्वम् कर्थः साधकतममिति तमपा वोध्यत इति व्यापारमात्रं तृतीयार्थः तस्मिन्नाह तत्त्वं स्यायेन नामसंबन्धेनान्वयः शेषं सर्वं वदिष्यत्रकुः । एवमिति । क-
र्तृकरणशक्त्योरविरोध इत्यर्थः । शक्तिविपर्ययादिति । एवस्थिते स्थाल्योदनं पचतीत्यादौ विवक्षात् तावत्करणत्वधारानां पक्तृत्वाचक कर्तृः कर्मविशेषप्रतिपादकानां यजे वज्रइत्यादिशब्दानां च सार्थक्या यत्नीवस्य कर्तृशास्त्रार्थवत्त्वादिमनेन कर्तृत्वे वोधिते दृष्टि
पदस्य वस्त्वार्थविज्ञानेमेवाल्लकर्त्रिति शंकायां विज्ञानस्याश्रयत्वाद्दुहेः कर्तृत्वाभ्युपगमे तत्र करणशक्तिर्याप्यापत्तिरित्यत आह तिरिक्तजीवस्यैव कर्तृत्वमनुचितमिति तदर्थप्रतिपादकेनशक्तिविपर्ययादिति सूत्रेणेत्यर्थः । नयुज्येतेति । कर्तृकरणश-
क्त्योरविरोधस्यैव भवद्भिरभिधानादिति भावः । निष्प्रमाणेति । अयं भावः यदि करणशक्तिस्याद्दुहेः कर्तृत्वमहंकारास्पदत्वं च कल्प्येत तदा वृत्त्यविज्ञाभूतस्य वोर्थकारिकरणांतरकल्पना प्रसज्येत किं तत्र कल्प्यमाकरणं तत्याह परसैव तथा
त्वमितिनोक्तदोषावसर इति तथा च तेनाणुविरोधस्यैव तन्मात्रार्थकस्याप्रतिपादनान्न तद्विरोध इति भावः नन्वलौकेसमर्थस्यापि करणं तरसापेक्षस्यैव कार्यकारिता दर्शनादतिरिक्तकल्पनावश्यकत्वे करणशक्तिविलोपश्चावश्यकोऽत आह । वस्तुत-
स्त्विति भवतोऽतशक्तिविपर्ययापत्तिरुक्ता नयुज्येतेति चेत्सत्यम् अस्मत्स्वयमात्रमेतदेतावन्मात्रः पाठः । अन्वयमात्रमेतदिति । तदर्थस्यानुपजिकत्वमेव न तत्रत्वनिर्भरत्वमित्यर्थः । आनुषगिकत्वमेव दर्शयति । यथा च तत्तोभयथेत्यनेन ।
स्वे च यथाद्यत्वर्थे तदिपरमात्मनो योजीवो नाम कश्चिदर्थो भोक्ता वा संभवति निष्कृदुदहुक्तामनः कर्तृत्वासुसंभवात् निर्मोक्षप्रसंगाच्च किं तस्याप्यतीवत्वेनायनीवेतिपक्षेऽन्तरेण लं तत्तत्त्वा वाच्यम् अविद्योपस्थापितं तत्तस्य स्वापत्तिय इति द्वे
तमिवभवतीतिदितरस्तरं पश्यतीत्यिश्रुतेः विद्यावस्थायां तदभावो यज्ञत्वसर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुतेः यथा च तत्तावास्याद्विकरणत्वात् कर्तृत्वदुःखीभवति स्वच्छन्दं शयोविमुक्तत्वात्स्याद्विनिर्मोक्षः स्वस्थीभवतीति तदर्थः तथाच-
बुद्ध्यगतवास्तवकर्तृत्वादेरध्यासमात्रमानि वस्तुतोऽकरणीभूतबुद्धेरेव कर्तृत्वम् स्वीकृतं करणशक्तिपरित्यागे तन्न तस्यायोऽस्ति सम्यगावेदितं भवतीति भावः । समस्यार्थनिरूपयति सप्तम्यास्वपीति । ननु तावता सूत्राद्याधारस्य वाच्यत्वमागतं नाश्रयस्ये-
त्यत आह । तत्त्वे चेति । आधारत्वं चेत्यर्थः । आश्रयत्वमिति । आश्रयत्वविशिष्टत्वमित्यर्थः आश्रयत्वविशिष्टे सूत्रेण शक्तिनिपातनेनाश्रयांशस्य वस्त्वंतताश्रयते पिनस्य कारकत्वादवोधे आश्रयशक्तितानस्य रूढत्वकल्पनादेव तदानोपपत्ते-
रित्याशयेनाह तत्राश्रयांशः शक्य इति । तत्र आश्रयत्व आश्रयत्वमात्रेणेति । आश्रयस्याधारस्य शक्यत्वे इति शेषः । संज्ञास्यादिति । तत्संज्ञितनामव्याश्रयस्य तायाः प्रतिपादनाकरणस्यापि फलजनकव्यापाराश्रयत्वादिति भावः । कर्तृकर्मद्वारे-
ति । अयमर्थः आधारोऽधिकरणमिति सूत्रसामर्थ्यादेवावसीयते तथाहि कारकत्वधिकृत्यैव तेन क्रियान्वय्याधारस्याधिकरणसंज्ञा विधीयते क्रियाधारत्वं च साक्षात्कर्तृकर्मणोरेव फलस्यापि क्रियाशब्देनाभानाद्वरूपात्त्वयोरुपराभ्यां कर्तृक-
नचैवं कर्त्राश्रयस्यार्थवत्त्वादित्यत्र रमीमांसाधिकरणे शक्तिविपर्ययादिति सूत्रेणान्तःकरणस्य कर्तृत्वे करणशक्तिविपर्ययापत्तिरुक्ता नयुज्यत इति वाच्यम् तदेवांशाणानां विज्ञानेन विज्ञानमात्रायेतिभ्युतं तरेकरणत याङ्कस्य
कर्तृत्वाकल्पने करणशक्तिविपर्ययापत्तिर्निर्दिष्टमारणकल्प्येतेत्यभिप्रायात् वस्तुतस्तत्वाचयम अन्मेतदिति यथा च तत्तोभयथेत्यधिकरणे भाष्य एव स्पष्टमित्यादि प्रपंचितं भाष्ये सप्तम्याश्रयार्थः सप्तम्यधिकरणे इति
सूत्रात् तत्राधारोऽधिकरणमिति सूत्राद्याधारः तत्रचाश्रयत्वम् तत्राश्रयांशः शक्यः तत्त्वमवच्छेदकम् नचाश्रयत्वमात्रेण कर्तृकर्म करणानामाधारसंज्ञास्यादेव यदितासिरस्यानवाधः कारकइति विहितत्सप्तम्याः
क्रियाश्रयत्वेवयद्यपि तावत्पर्यन्तयापि कर्तृकर्मद्वारा तदाश्रयत्वमस्त्येवस्थाल्यादेर्भूतलकटादेश्चेति स्थाल्यां पचति भूतले वसति कटे शेते इत्याद्युपपद्यते उक्तंच वाक्यपदीये कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियां ।
उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतमिति । औपश्लेषिकं वैषयिकमभिव्यापकं च कटे शेते गुरौ वसति मोक्षे इच्छास्ति तिलेषु तैलमिति संहिताया मिति सूत्रे भाष्ये स्पष्टम् । अवधिः पंचम्यर्थः अपादाने पंचमीति सू-
त्रव्याख्यानात् अपायो विश्लेषस्तज्जनकक्रियानन्वयावधिमित्यर्थकाद्ध्रुवमित्यन्वयमिति भावः उक्तंच वाक्यपदीये । अपाये यदुदासीनं चलं वा यदि वाचलम् ध्रुवमेवातदावेशात्तदपादानमुच्यते पततोध्रुव एवाश्रयादश्वात्पततेति
संज्ञाभ्यामाक्रांतत्वादिदं सूत्रमनवकाशं स्यात्परंपरयाक्रियाश्रयस्याधिकरणसंज्ञाविधानेन च रितार्थम् परंपरा च कर्तृकर्मणी द्वे इति परयाकर्मसंज्ञया वाधादेव मोदोरस्थाली निवत्त मोक्षे इच्छानिलतिनियोगः । औपश्लेषिक-
मिति । सामीप्यसंबंधनिबन्धनमित्यर्थः आधेयव्याप्यतावच्छेदकयत्किंचिदवयवकमितियावत् । वैषयिकमिति । विषयतासंबंधनिबंधनमित्यर्थः । अभिव्यापकमिति । आधेयव्याप्यतावच्छेदकसर्वावयवकमित्यर्थः
तत्राद्यस्य कटे शेते गुरौ वसतीत्युदाहरणं द्वितीयस्य मोक्षे इच्छास्तीति अंत्यस्याद्यम् कटे शेते इत्यादौ परंपरया कटाभिन्नाश्रयकः शयनानुकूलो व्यापार इति बोधः । इतिभाष्ये स्पष्टमिति । तत्रहि संहितेत्यधिकारे अध्ययनाध्यायीयोगः शक्यो वक्तुं अधि-
करणं नाम त्रिः प्रकारं व्यापकमौपश्लेषिकं वैषयिकमिति इक्शब्दस्य इकः स्थाने यण्स्यादचीति सूत्रे अनंतरमुपश्लेषात् इकोयणचि अचि उपश्लिष्टस्येति तं तर्हि नानतरेण संहिता ग्रहणं संहितायामेव भविष्यतीत्यत्र कृतम् अत्रोपश्लिष्टपदाध्याहारेण
सप्तमीत्यर्थः इत्येवमाभाष्यप्रमाणं संहितायामित्युपलक्षणं तत्रत्वं वृत्तीयत्वेकार्यं भवतु तदस्मिन्नधिकमितिसूत्रयोरभाष्यस्य तत्राप्यधिकरणे विधवस्य स्पष्टं प्रतिपादनादिति । नैयायिकास्तु । आधारत्वं संयोगेऽन्वयोपाधिः संयोगेनाधिकरणं समवाये
नाधिकरणमित्याद्यनुगतव्यवहाराणत् संयोगादिरूपत्वं तत्र कुंडादिसंयोगानो वदरादेरपि कुण्डाधारतापत्तेः । वस्तुतस्तु संयोगेनाधारत्वं संयोगादिरूपमेव नत्तो क्तानिप्रसंगः कुंडवदरादिसंयोगानां वदरादावनुयोगितानिरूपणात् तथा-
च संयोगनिरूपितानुयोगित्वमेव संयोगेनाधारत्वम् कुंडादेः कुंडादिनिष्ठसंयोगानुयोगितासत्त्वात्तदाधारतापत्तिरितिन समंजसम् तादृशसंयोगस्य कुंडादिनिष्ठत्वेपितस्य प्रतियोगिकत्वानुपगमात् तत्प्रतियोगिकत्वविशिष्टतत्संबन्धानुयो-
गितायाएवतत्स्वाधारतावच्छेदकरनियामकत्वात् वदरादेः संयोगेन कुंडाधिकरणमिति प्रतीतेरप्रामाणिकतया कुंडप्रतियोगिकत्वस्य तस्मिन्ननभ्युपगमात् कुंडे वदरमिति विशिष्टबुद्धौ च संयोगप्रतियोगितायाएव वदरे संवंधतयाभानं घटे रूपमि-
त्यादौ समवायप्रतियोगिताया एव अन्यथा तादृशविशिष्टबुद्धिवलादुपादानपि समवायानुयोगिताप्रसंगात् नव्याः पुनः संयोगादीनामेवाधारतास्वाय नियामकत्वे महानेमध्याधारतावच्छेदकरूपतिगंतप्रतियोगिकत्वविशिष्टसंयो-
गानुयोगितायाभूतलादाविवमहत्तेपि सत्त्वात्तस्मात् वौक्तकल्पएवज्यायानित्याहुः । एवं चैतादृशमाधारत्वमाधेयत्वमेववासप्तम्यर्थः भूतले घटइत्यादौ च घटक्रियाया वकपदसमभिव्याहारस्थलेऽपि सप्तम्याः पदाध्याहारेण कारकत्वनिर्वाहम-
वलंतस्तु अधिकरणसप्तम्यर्थापेयत्वस्य कर्तृकर्मणोरेवान्वयः नत्वक्रियायामपि कटे शेते चैत्र इत्यत्र कटवृत्तिचैत्रवृत्तिशयनानाश्रयइतिबोधः क्रियायास्तु कर्तृकर्मद्वारकपरंपरासंबंधस्य तत्र सत्त्वात्क्रियान्वयितत्कारकाणां क्रियान्वय-
युक्तिरप्येतच्छास्त्रवलादीदृशव्यतिरिक्तविषयापि अतएवात्वशेत्याद्यौ सामर्थ्यापपत्तिरेवं च भूतलेघटोऽस्तीत्यत्र भूतलाहरिर्वर्तमानसत्त्वाश्रयो घट इतिबोधः अतएवतत्समभिव्याहारे सप्तम्यर्थाभाववोधकत्वं भजत इति तत्रतन्नोक्तं संगच्छते य

एतच्चवि विधं
तदधिकरणं विषयि
दान मितिसूत्रात्

भ॰ सा॰ ८ तस्मात्तेनैव बदरत्वात्तैः सप्तम्यधिकरणे चेति चकारादुक्तार्थेपि सप्तमी नानात्वाद्व्याख्यात्वेन नञ्समभिव्याहारे बदरे नञर्थाभावात्त्वयानुपपत्तिरिति निरस्तो भवन्ति । तस्माद्दूरं तिकार्यो भोगाम्नसप्तमीविधायकतया प्राकारसिद्धतया तादृशार्थस्यानिष्प्रमाणत्वादिति ।
२२ पंचम्यर्थं निरूपयति अवधिः पंचम्यर्थ इति विश्लेषइति । विभागस्तत्पर्थः अवधिमत्त्वमिति । अवधित्वं तत्र द्विभागजनकक्रियानाश्रयत्वे सति तद्विभागाश्रयत्वम् । करणादिकारकेति व्याप्तिवारणाय विशेषणम् पत्रिकं चिक्रियाजन्यविभागस्य तत्रापि सत्त्वादतिप्रसं
गतादवस्थमतो विशेष्यकोटिनिविष्टविभागे प्रकृतधात्वर्थपदं त्यक्तमिति विशेषणमेवं च वृक्षात्पततीत्यादौ पंचमो समस्यात्स्वादौ विभागजनकक्रियापत्त्वेनायमर्थः यदत्सति यत्रधात्वन्तरार्थानिरूपितार्थे धातवः तदुपात्तविषयमित्यवधिकं दृतिपयद्यावात्वादसरो
मूलकृतैव वक्ष्यते तत्र दृष्टिसंमतिमाह । उक्तं चेति । उदासीनेति विश्लेषमाह । चलं चेत्यादिना । चलं क्रियाश्रयो वृक्षादिः अचलोऽप्यावादिः । तत्क्रियानाश्रयत्वादिति । तद्विभागजनकतत्क्रियानाविष्टत्वादित्यर्थः । क्रियाश्रयत्वादिति । तथा चाव्याप्तिरिति भावः । वि
शेषणीयमितीति । तथा च विभागस्तत्र यक्रियेत्वेन लत्ते विशेषणीयत्वमिति भावः अत्रेत्समाधत्ते । विभागे प्रविभक्ते त्वित्यादिना तत्र मेषशतित्वविशिष्टत्वे न तिन्न तयावगतेरत्यर्थः । व्यवच्छिनत्तीति । तत्र मेषवृत्तित्वविशिष्टसंयोगजनकक्रियेत्तन्मेषा
नाश्रित्वे भवतेत्यर्थः तदेवाह । मेषान्तरक्रियापेत्तमित्यादिना । परस्परदेशान्तरयोः सन्ति परस्परमन्नत्वं तत्र क्रियाश्रयत्वाद्ध्रुवमेषपदेशान्तरयोः कर्तृत्वं वोपपद्यतइत्यर्थः तत्र द्योतितत्वे विशेषितापि क्रियाप्रकृतधात्वर्थस्वरूपं प्रेमाह । केपावेति । नार
शहृदनिष्ठक्रियायाः प्रकृतपतधात्वर्थत्वाभावेन तद्रूपविहते नाव्याप्तिरिति भावः । इदमत्रतत्त्वम् पंचम्या आश्रयत्वविभागे पर्योऽविभागार्थकपतत्वादिसमभिव्याहारेकस्य [illegible] विभागेशक्तिकल्पनापेत्तये कस्याः
पंचम्यास्तत्र शक्तिकल्पने लाघवात् विभागस्य धात्वर्थत्वे द्वितीयादिस्थलेऽवविभागस्य धात्वन्तरानाभावाद्यमनाचे पंचम्यर्थइति ब्रूयात् अवधेराश्रयात्मप्युपादानत्वेऽपर्योऽप्निजिपमेः पर्यायतापत्तेश्च तस्मात्तत्रविभागजनकक्रियावत्त्वमर्थः किंत्व
योदेशसंयोगानुकूलव्यापारएव अपोदेशस्थसंयोगफलेउपलत्तणम् गम्युपात्तसंयोगफलत्तत्त्वदेशवद्विभागाधीनत्वं संयोगनाशं विना क्रियायाः संयोगाजनकत्वात् स्याविभागजनकत्वावश्यकत्वात् समानप्रत्ययोपात्तत्वप्रत्यासत्त्या बुद्धिस्थे
त्रिये णाश्रयत्वपरपंचम्यर्थस्य विभागरूपपरतटदृष्टाः धेयत्वात्वयस्य चजनकत्वसंबंधेन क्रियायां एवं च विभागस्य धात्वर्थत्वाभावान्न हत्वादेः कर्मत्वाशंकालेशोपि अत एव वृक्षात्पर्णमभिपततीति प्रयोगोपपत्तिः यदा अवधित्वमाश्रयत्वा
तिरिक्तमवच्छेदकोपाधिः अवधित्वपत्तन्नत्वदवकुरात्रस्तरवंक्रिन्नावधिरेव पंचम्यर्थः अत एवाश्रयोवधिरित्युच्यते त्वान्वयेः एकपुत्रेवेः तस्य तस्य तिष्ठावधित्वनिरूपकविभागजनकत्वसंबंधेन क्रियायामन्वयः एवं च प्रथमकल्पे वृक्षात्पर्णपततीत्यत्र
ताभिन्नाश्रयकविभागजनकपर्णाश्रयकसंयोगानुकूलो व्यापारइति बोधः चरमे तु वृक्षाभिन्नावधिविशिष्टात्तादृक्क्रियेति तद्रूपेपि विभागस्य तत्तत्साक्षित्वेनैव निवेशेन तथात्वर्थत्वेनेति विभागजन्यसंयोगस्य तन्नपत्यर्थता पत्लगताविरुद्धशास

तस्य पाप्यस्य पतने ऽपि संयुक्तयमसत्वाने उभावधारणेर्मेषयोर्यपृथकर्मजे विभागे प्रविभक्ते तक्रियेतत्वावधित्वे मेषान्तरक्रियापेत्तमवधित्वं एथक्त्वयरूक् मेषयोः स्वक्रियापेत्तं कर्तृत्वं च एथक्त्वयमिति अयमर्थः अपाये विश्लेषे हेतुः क्रियायां उदासीनं
अनाश्रयः अतदवेशात् तत्क्रियानाश्रयत्वात् एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् वृक्षात्पर्णपततीत्यत्र पर्णस्य तदारूपस्य तत्र धावतोश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेतुक्रियेति कुड्यात्पततोश्वात्
पततीत्यत्राश्वस्य विश्लेषजनकक्रियाश्रयत्वेपि न तद्विरुद्धमित्याह । यस्मादश्वादिति तद्विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषशालीत्यमितिभावः एवमसुक्रियाक्रियानाश्रयत्वात्वाद्यादेरपि ध्रुवत्वमित्याह तस्यापीति उभयकर्मजविभागस्थले
विभागे वक्तृविवक्षितजनकक्रियानाश्रयत्वाभावात्परस्परस्मान्मेषावपसरतः इत्यादिस्थले कास्य समाधत्ते उभावपीति मेषान्तरेति यथा निश्चलमेषात्पसरन्तीत्यमेव स्थले निश्चलमेषात् अपरमेषमादाय ध्रुवत्वमतथात्रापि विभागे कोपि क्रिया
मेदात्मकक्रियामादाय परस्य ध्रुवत्वमिति तथा च विश्लेषाश्रयत्वे सति तद्विभागजनकतत्क्रियानाश्रयत्वं तत्क्रियायामपादानत्वं वाच्यं क्रियाप्रयोगे नेत्यन्दः तेनचैत्कर्मजविभागवतिवृक्षे वृक्षात्पतत्पततीति संपद्यते वस्तुतो नैतद्वस्त्वं च
प्यावात्वेतिं नवपेलं सरणमात्रे द्वितीयार्थे करीत्यातिप्रसंगासंभवेन वाद्यकोटौ प्रवेशस्य गौरवेणासंभवादित्प्रतिभाति न चैवं वृक्षात्पर्णं उदत्रतिसाहितिशयम् आसनाच्चलितइति वदितुं त्वात् पतेनपंचमीजन्यापादानत्वोपेसकर्मकधातुमो
पस्थितेर्तत्वमितिसमाधानाभासो निरस्तः नचैवमपि हेतात्वजनीतीत्युक्तौ [illegible] कर्मसंज्ञयापादानसंज्ञाया बाधेन तदसंभवात् अपादानेनपाप्रयोगेयदि वोधाभावोऽनुभवसिद्धस्तत्र पंचमी जन्यापादानत्वोधेपत्ताभिन्न अपोपाधितेह तत्वं
वाच्यम् तत्ताइतकादिद्योतनेविद्युदिस्यादौ निःसृतेनयथार्थम् नयंरसात्स्यकिस्वतद्विपरिकल्पितमपादानत्वं द्रुवम्
तात् गतिशब्दस्य संयोगानुकूलव्यापारएव प्रसिद्धः गम्लृगतावित्यत्र य पात्मार्थेण तिष्ठवत्सराभावाच्चपतनेः संयोगानुकूलव्यापा
र्थकत्वेऽग्रामं गच्छतीतिवद्ग्रामं पततीति प्रयोगापत्तिरितिन शक्ति शक्तिस्वाभाव्येन तदुपस्थितसंयोगस्याधोदेशवत्त्वयात् यामस्य पतत्वेनविस्योग्रामं पततीतिविषमेव अतएवनाजपतितश्च तितियिदृक्कि द्वितीयाप्राप्तिते तिस्त्वे शापतितनशदृयोगे द्वितीयाप्रस
सविधानं संगच्छते नच वृद्धमजरूप्य पिपर्णोऽभिसंसश्तिहदन्नपर्णपततीति प्रयोगापत्तिः तदुपस्थापक्रियाजन्यविभागे वृक्षवधिकत्वाभावात् अस्य याक्रियाजन्यसंयोगमात्रस्येव विभागजन्यत्वाद्भूमिपर्णसंयोगस्यापि तथात्वेन तस्मात् पितादृशप्रयोग
पत्तिर्दुर्वारा स्यात् अत एव गतिर्विनाशत्वव्धिनानापपत्तिकल्पते वृक्षात्पर्णपततीत्येवं भावो निर्दृष्टत्वमिति अवधान्वयोगविभागानुकूलत्वं विनागतिः संयोगजनिका क्रियानपायः अत एव पर्णविशेषणतया रस्तविरत्वा यामपायस्याविवक्षणादृस्य
पर्णपततीत्यत्र भावेष्यपसु केलिनस्पर्शकं स्पृशतीत्यादि यत्रतत्त्वस्पृशतीत्यादौ विभाग एव धात्वर्थस्तत्राश्रयमात्रं पंचम्यर्थस्तस्याधेयतया विभागे त्वयः पररूपस्मात्प्रासादावरोहतीत्यादौ तमेवपदोपादानत्वयोरेवक्रियाश्रयत्वे परस्परपदोपात्तयोरेवविभागाश्र
यत्वेप्रचालितिमितार्थी स्वेवशात् हवोधेभानात् अत एव देवदत्तयज्ञदत्तावन्योन्यस्माद्विभजतइत्यादौ कर्मत्वसिद्धिः आसनान्मासमनाः तीत्याह वक्तः कारणस्युपाधिकृतभेदाश्रयत्वत्तत्र कृतेश शोपाधिकतमेदाश्रयणादन्यथापरस्य पदार्थस्य तादृशक्रियावत्वेनकु
र्दतयापादानत्वोपपादनासंभवात्तद्दतत्र्यपगमेतत्परस्परपदस्वाच्छ्याविच्छेदेनकर्तृत्वाविवक्षणात्तद्योपपत्तिरित्यलम् अपादानत्वस्यपंचमीवाच्यतावच्छेदकत्वेगौरवं मनसिकृत्याह किंत्विति लाघवमाजमिति । सोऽयमपदेनवाच्यतावच्छेदकतयावछेदः तथा चमि
हक्रमवधित्वं आदिफलकं पंचमीशक्यं तु विभागाश्रयमात्रमाश्रयमात्रं वेति भावः ननु दिव वृक्षात्पर्णपततीत्यत्र पर्णेपि विभागाश्रयत्वस्य सत्वात्तदुत्तरं पंचम्यापत्तिरित्यत आह । अतिप्रसंगस्येति द्वितीयार्थी करीत्येति । चैत्रो ग्रामं गच्छतीति विस्तरे संगच्छतीत्याप
त्रिवारणाय परया कर्तृसंज्ञया बाधादित्युक्तरीत्यर्थः संबंधत्वप्रत्ययत्त्वत्वजन्यविभागाश्रयत्वस्यदेसत्वादतिप्रसंगमाशंकानिराचष्टे । न चैवमिति वृक्षादिति । जलनचकर्तृ असमभतेवत्र विभागस्य धात्वर्थत्वाभावादेवानतिप्रसंगादिति भावः । वृक्षादिति
चलत्यर्थं क्रियाजन्यविभागाश्रयत्वस्य सत्त्वरूपत्वगेजन्यतदाश्रयत्वाद्वृक्षस्यावधित्वेन तद्वाचकपदोत्तरंपंचम्यापित्तिप्रसंगवादित्यर्थः वृक्षस्यैवकर्तृत्वविवक्षायां तत्पदयाकर्तृसंज्ञया बाधेन तथाप्रयोगापादनेऽनुशक्षंचेतः एवदतरतिप्रयोगस्येव
तदानीमिष्टमाणत्वादिति भावः । दुर्वारमिति । धात्वर्थक्रियाजन्यविभागाश्रयत्वादितिभावः । कर्मसंज्ञयेति । तत्त्वत्वत्पत्यर्थव्यापारव्यधिकरणफलाश्रयत्वं वृक्षाशयः । अनुभवसिद्धइति । वस्तुतो विभागावधित्वस्य वृक्षोवाधावत्त्वस्य बोधस्य प्रमात्वमिष्ट
मेव विषयवाधस्येवाप्रमात्वनियामकत्वात् त्यजनेः पतत्पर्णलत्तणा वृक्षात्पर्णपततीत्यत्रैव योगसाम्प्राप्तिकत्वेनैकारणतावच्छेदककोटौ धात्वंशे नजादि भिन्नत्वस्य निवेशयितुमशक्यत्वादेतदपि प्रेत्तो वोभं यदीति विभावाम् । निःसृत्येति । निः
सरणंगमे विधोतनेधातोर्हतिनपगमपंतमुपपाद्येत्यर्थः अनयवोपात्तविषयेणान्तर्भावो वत्स्यमाणः संगच्छते । अतिप्रिकल्पितमिति । तत्र पर्णपतीति निपानस्यघोतकतया धावत्वलोपाद्वोरे वद्विभागं गच्छापारत्वस्य तत्पादुपपादामन्यथाकत्वात्तत्त्वपथ २२

त्वृशस्याधानत्वेनडक्रमतएवाह । इष्टुमिति सान्तादिति । मुख्यत्वमेत्यर्थः धात्वर्था । समभिव्याहृतेन गतिरिति । संयोगजनकक्रियेत्यर्थः । उपात्तविषयमिति । समभिव्याहृतधात्वर्थेनोपात्तोल्लसितो विषयोगनिरूपोयत्रेत्यर्थः अपेक्षितक्रियमिति ।
समभिव्याहृतपदानुपस्थितक्रियासाकांक्षमित्यर्थः । वलात्कारादिति । वलात्कारकपदार्थश्च स्वममनुष्योनिःसरति तत्सन्मुखः तत्रैव यव भूतस्योनि सामेव विभागविवक्षणस्तो वधिः श्रुतिश्च तच्चलव्यानिःसरणपूर्वकविघातनवोधकः तथाच वलाह
कावधिकनिःसरणेनानुरणकालिकविद्युद्धिघातनमिति वोधः । आगमनार्थमभ्याहृतेति । अर्थाध्याहारो नाभिप्रायेण पदाध्याहारवादेत आकांक्षितक्रियावाचकपदानुसंधाने विपरीतस्याग्रधमाणत्वादुक्तलक्षणैकत्वप्र तत्रप्रमाणंतद्वोध्यश्च स्मादेरे
त्यत्यत्रे योगे चतुर्थीविधायकं स्पृहेरीप्सितस्त्वं तद्योगं विनाचतुर्थ्यनुपपत्तेः अर्थाध्याहारवादेतत्प्रवृत्तियान तत्स्वत्रेनार्थकमणिचतुर्थीविधायकंक्रियार्थोपपदस्येतिसूत्रं सूत्रान्तरवार्तिकानिचप्रमाणतयाध्येवसेयानीत्यधिकमन्यत्र । च
तुर्थ्यर्थंनिरूपयति उद्देश्यत्वस्य तुर्थ्यर्थ इति । ननूद्देश्यत्वं कामनाविषयत्वं तच्च संयोगेर्विप्रस्य भवतिस्याकारककामनाविषयेण वादावतिव्याप्तमतआह उद्देश्यत्वंदर्शयितुं सम्प्रदानेति । कर्मणायमिति करणभूतेनेति । इच्छाकर्मणीभू
तद्दानस्यार्थकर्मणोगवादिनेतियावत् । यमभिप्रैतीति । कर्मनिष्ठफलसंवन्धितप्रकारकीयदिच्छाकोभिप्रायइतिवार्थः कर्मनिष्ठफलनिरूपकत्वप्रकारककर्त्रिच्छाविशेष्यइतियावत् तत्त्वमेवसंप्रदानत्वं यद्यपीयंगोर्विप्रस्य भवतितीदीयमि
प्रनिरूपितस्वत्वप्रकारतानिरूपितविशेष्यतावत्वे गोरेवतथापि नविनाइशेच्छाविशेष्यत्वेवनतेविषयितास्यादितिवेषतयेच्छीयगोनिष्ठस्वत्वनिरूपकत्वप्रकारतानिरूपितविशेष्यत्वमेवगम्यतएवेतिनलक्षणसंभवइतिभावः । इदमेवेति । क
र्मनिष्ठफलनिरूपकत्वप्रकारकनिरुक्तेच्छाविषयत्वमेवेत्यर्थः । शेषित्वमिति । मुख्यत्वमित्यर्थः तदुद्देश्यकेति । इदमेवत्वस्यभवत्विप्रकारकविप्राद्युद्देश्यकेच्छाविषयत्वमेवेत्यर्थः । शेषत्वमिति । अप्राधान्यमित्यर्थः । एवंतच्च । एवंमीमां
सायामित्यर्थः । अतएवेति । उद्देश्यस्यप्राधान्यादेवेत्यर्थः ननुयत्र दानात्तरथीनी करणार्थक स्वत्वाधीनत्वादिरूपफलभागितयेच्छाविषयस्य रजकादेः संप्रदानत्वमस्याद्याधा इजकाय दस्तुं ददातीत्यत्र एवं ददातीतिप्रसज्येतेत्यत आह । रजका
येति इत्यापत्तौ प्रमाणमाह । आहेति । प्रसिद्धयोगेददातिः संयोगानुकूलव्यापारार्थकः चपेरापदार्थस्वत्वप्रकारकस्वत्वम् तदुक्तात्पमतिं दधातीत्यत्र ददातीत्यौ धनार्थकः मतिर्यत्र धार्थश्चतज्ञानकं वेदार्थाप्तिमित्यवधेयम् । स्वस्व
त्वनिहत्तीति । परस्वत्वोत्पादकस्वस्वत्वध्वंसानुकूलव्यापारमित्यर्थः अर्थ । दधातश्च तथाचोक्तार्थकदाधातुयोगपव संप्रदानसंज्ञायाः साधुता अन्यथा तादृशगुरुसंज्ञाप्रणयनवैयर्थ्यापत्तेः तथाचतस्मतेतत्कर्तृकनिर्णीतनेच्छाप्रका
शकव्यापारेऽयधात्वर्थस्तदेकदेशेकर्तृत्वेरजकस्यसंवन्धविवक्षायां षष्ठीसिद्धांतेतन्निरुक्तसंप्रदानस्यसंवन्धत्वविवक्षायांषष्ठीकोधनतादृशार्थकोधातुस्तत्रभावेऽन्वयसंज्ञा नास्त्रयरजकस्वत्वादादुरिति ननुगोयामं नयतीत्यत्राजायांनिरुक्त
संप्रदानत्वस्यसत्वात्प्रामकाद्युक्तचतुर्थ्यापत्तिरितिचेत्स्यादेवं यदि परस्याः कर्मसंज्ञायानवाधः इति यूपायदारुइत्यादौनसंप्रदानचतुर्थीअपितुतादर्थ्ये तादर्थ्येनसप्रत्यार्थः प्रयोजनमसपनत्वम समभिव्याहृतार्थे तादर्थ्यविवक्षायांतद्वाचकाच्चतुर्थी
तिताद्र्थ्येचतुर्थीत्यस्यार्थः प्रयोजनत्वं चजनजनकत्वं दुःखाय पापमित्यत्रायादुःखायपापमितिप्रयोगापत्तिः नापिजन्यत्वयेच्छाविषयत्वं स्वर्गादेः उपस्थितजन्यत्वयेच्छाविषयत्वेन स्वर्गायउपस्थिमित्यापत्तेः तत्रेष्टापत्तिः तथासतिपर्कोपजनतीय

एवाग्निरेतिपंचमीवा इदंचनिर्दिष्टविषयंकिंचिद्धेपात्तविषयंतथा अपेक्षितक्रियंचेतित्रिधापादानसंज्ञातरतिवाक्यपदीयात्रिविधम् यत्रसाक्षाद्धातुना गतिनिर्दिश्यतेतन्निर्दिष्टविषयं यथाश्वात्पततीति यत्रधातुंतदर्थांगं स्वार्थंधातुराह
तदुपात्तविषयम् यथावलाहकाद्विद्योततेविद्युत् अत्र निःसरणांगेविद्योतने द्युतिर्वर्तते अपेक्षिताक्रियायत्रतदंतम यथाकुतोभवानपाटलिपुत्रात् आगमनार्थमध्याहृत्यान्वयवोधः उद्देश्यत्वस्य तुर्थ्यर्थः चतुर्थीसंप्रदानेइतिसूत्रात्तदुक
र्मणायमभिप्रैतीतिस्वत्वात्कर्मणाकरणभूतेनयमभिप्रैतितत्कारकंसंप्रदानाभिधमर्थकाउद्देश्यः इदमेवचशेषित्वम् तदुद्देश्यकेच्छाविषयत्वचशेषत्वमिति एवंतच्चनिर्णीतम् अतएवयज्ञासनवनोवा वरुणायदंडप्रदानमित्यधिकरणेतही
नेमोनेमेवावरुणायदंडंप्रयच्छतीतिविहितदंडदानेनप्रतिपत्तिः किंत्वचतुर्थीश्रुत्यार्थकर्मेतिनिर्णीतम् रजकायवस्त्रंददातीत्यापिरजकायामपायःक्रियापाघःक्षिप्तापतयेपेक्षद्दातीतिभावाप्रयोगादिष्टमेव हृतिकाराणस्यसम्पत्करस्येनयसोतस्प्र
दानमित्यत्वर्थमंत्वासत्वतनिरुक्तपर्यंतमर्थवर्णांयेतोरजकस्यसत्वमित्येवाहुः इदंचानिराकरणकर्तृरूपाणांगं कर्मलेप्सितं प्रेरणानुमतिभ्यां चतुर्भेदेसंप्रदानतामितिवाक्यपदीयात्रिविधम् ।

र्थपाकायवत्रतीतिप्रयोगनिर्वाहायतन्मर्थाचेति
स्वत्वप्रणयनवैयर्थ्यापत्तेः पाकादेर्निरुक्तवृजनार्थत्वेवन्नदाचकाद्वार्तिके नचतुर्थ्युपपत्तेः अपितुसमभिव्याहृतपदार्थनिष्ठव्यापारेच्छानुकूलेच्छाविषयत्वं तत्प्रयोजनकत्वरूपं तादर्थ्यं चतदिच्छाधीनेच्छाविषयव्यापाराश्रयत्वं दारुणोयूपेच्छाधीने
च्छाविषयतक्षणादिव्यापारवत्त्वात्स्वपार्थत्वमिति तद्धिवत्या यूपपदाच्चतुर्थी तत्रेच्छाधीनेच्छाधीनव्यापाराश्रयत्वं चतुर्थ्यर्थः प्रथमेच्छायांयूपादेःप्रकृत्यर्थस्यविषयित्वेनान्वयः तस्याश्रयतयादारौ दाववंधनायस्थालीत्यादावप्यागम केचित्तुजन्य
येच्छाविषयत्वमेवप्रयोजनत्वं तत्प्रयोजनकत्वं तदिच्छाधीनेच्छाविषयत्वमेव नचतमर्थेतिसूत्रवैयर्थ्यम् वार्तिकं इष्टासत्रं दुःखेतोप्रवृत्तेः स्वर्गायउपस्थितस्यादयःप्रयोगाश्चित्प्राएवेत्याहुः नमःस्वस्त्यादिसूत्रयोगेपितदर्थविशेषणवाचकान्नमःस्व
स्तीतिसूत्रेणचतुर्थीविधीयते नमःपदार्थश्चयागोगतिश्च तत्रेशोर्हाः शिवायनमइत्यादौत्यागः चतुर्थ्यर्थः तत्रप्रकृत्यर्थशिवादेरुद्देश्यत्वसंबन्धाग्न्यते त्यागस्यायं यदिशिवस्यायंभवतिस्यादिफलेच्छाधीनत्वममेत्याकारकस्वस्वत्वेच्छाभावरूपः तदातं
उद्देश्यत्वंत्यागजनकेच्छायाः स्वत्वभागितयाविषयत्वम् यदित्यागस्यैवेतस्यस्वत्वाभावमिवाभ्यहीयत्वे नत्वप्रमानगंतेस्वत्वमपितत्रविषयीकरोतिनतयास्वत्वभागितयात्यागविषयत्वमेवतदुद्देश्यत्वम् शिवादेर्विग्रहवत्त्वेपिस्वीकाराभावात्तदाकार
नपाधानमंत्रस्पताणोद्देश्यतामतेतद्भावाच्चनसम्मानोपचाराद्देशिवादिनिरूपितस्वत्वाभावेपितदीयत्वेनतद्दव्यस्वत्वावगाहि नीलाविसंवादिरूपेव अन्यदीयस्वत्वेवाधितेपिवादिनिरूपितत्वंशिवादिनिरूपितप्रसिद्धस्वत्वेनरेवावाधितनमइ
दंशिवायनमवगाहते तत्रप्रथमकल्पेस्वस्वत्वप्रकारकेच्छाजन्यत्वंजन्यतासंवंधेनताद्दशेच्छावत्वंवाचतुर्थ्यर्थः तत्रप्रकृत्यर्थस्यशिवादेर्निरूपिततावि शेषसंवंधेनान्वयः नमःपदार्थत्यागस्यविषयताविशेषसंवंधेनाधेयेर्द्वितीयेन्वयः इच्छास्येववावि
रोध्यतयाभासमानत्यागेन्वयः शिवायोत्सृजतीत्यादाविवनात्रानिराकर्तृसंप्रदानता नमःपदस्याधावत्वात् नमःपदेनचस्वप्रयोक्तृपुरुषकर्तृकत्वोपलक्षितगतेप्रकर्षविषयत्वेनमःपदेनाश्वीयत्यागावोधनात् तन्नरूपोच्चरितनमःपदाश्रा
णवोधेत्यागेत्यप्रमानइवोचतदीयत्वसंशयानुदयात् अतएवतदीयत्वगोधनायास्मदइतिवदेतेनमइत्यादिनप्रयुज्यते अपितिगात्रयजमानरूपपुरुषार्थानरीयद्रव्यत्यागेस्वीयत्वमारोप्यैवप्रजायांनमःपदप्रयुज्यतेसचातोपस्ताभिविशेषदर्शनदशायाम
पाहार्यतयोपपद्यतेइतितिभिप्रेत्यक्रदानवाक्यस्यैवप्रजायांनमःपदघटितवाक्यस्यवाधितार्थकत्वेपारइजनकत्वंनविरुद्धंशास्त्रप्रामाण्या दित्याद्यन्यत्रविस्तरः । अनिराकरणादिति । प्रहत्तिनिरोधाजनकानुकूलव्यापाराभाववत्त्वादित्यर्थः त्यागं
गमिति । त्यागोधात्वर्थोज्ञापनात्मकः तथाचधात्वर्थक्रियात्वमित्यर्थः इदंचशिवायेत्यादौनमइत्यादौ शिवादेर्वारणाय कर्मलोप्सितमिति । कर्मनिष्ठफलनिरूपकत्वेनकर्त्रिच्छाविषयइत्यर्थः अनिराकरणादित्यादिपंचम्यंतद्वयस्य संप्रदानताभा
न्वयः कर्त्रीरिति धात्वर्थव्यापाराश्रयस्येत्यर्थः दानादिकर्त्रीरितियावत् इदंचानिराकरणेपोकदेशप्रइत्यादौन्वयि प्रेरणेत्यादि । नत्राग्रइत्यस्य कर्तृत्वगारादिविहसाधनत्वादिवोधनंप्रेरणं ज्ञातेष्टसाधनताबोधेऽज्ञामात्ययपोकथा शिथिलस्यकर्तृत्वा
इत्याकांक्षाविरहेननत्वमागमादिप्रमालोपन्यासवत्रं कर्मनिष्ठस्त्वादिफलाभ्युपगममात्रानुकूलव्यापारवत्त्वंदनुमतिस्ताभ्यामित्यर्थः एवंचकर्मनिष्ठफलभागितयेच्छाविषयत्वेसतिकर्तृप्रवृत्तिनिरोधाजनकव्यापाराभाववत्त्वमनिराकर्तृत्वम्

भू.सा.द.
२२

निरूक्तविषयत्वेसति कर्त्तृसंबन्धित्यागादिनिष्ठेष्टसाधनतावोधौपयिकव्यापारवत्त्वं प्रेरकत्वं निरूक्तविषयत्वे सतीतरप्रवृत्तिप्रतिबन्धकमर्थं कत्वद्विषये इत्याप वत्वे तो प्रयोजक व्यापारवत्त्वमनुमंतृत्वं संप्रदानत्वमितिरीत्योत्तम् । रक्षीयाद्येद्दानीति ।

अत्र तु प्रधानो भेदत्वमभेदेन परस्वत्वे क्राप्नीनस्यस्त्वाभाविह्ता रूपः परस्वत्वगोचरस्वस्वत्वाभावेच्छारूपो वार्थः अत्वयबोधस्तु नमःस्वसीति सत्रोक्तदिशोरूनीयः । सर्वत्रेति । ननु तत्र विभक्तितद्वितीयायां तत्प्रयोगे वितार्थः । अभेदसंसर्गेति । अभेदात्मकः

संसर्गो विशिष्टबुद्धिनियामको विशेष्यस्यार्थः अभेदसंसर्गकप्रकृत्यर्थप्रकारकबोधं प्रति संबंधवत्त्वादिभिन्नविभक्तिजन्योपस्थितेर्हेतुत्वादितिभावः यत्तु संबन्धस्य संबंधिभेदनियतत्वादभेदस्य संबन्धत्वे मानाभावादभेदः संसर्गः स्वस्वाभेदे पिंड

सर्गद्वतरसंबन्धानवच्छिन्नविशेष्यविशेषणभावः संसर्ग इति तन्न । विशेषणविशेष्यभावस्यापि संबन्धनिरूप्यत्वेन तदभावेन तस्याप्यसंभवात् कथमन्यथापि द्विष्ठेप्यसाविति विपक्षवाद्ये अवसरे विशेषणत्वेन विवक्षितस्य संबंधं विना विशेष

णत्वासंभवेन तदाकान्तित्वादितिस्वयमुक्तं अनन्वभासमानवैशिष्ट्यप्रतियोगित्वं विशेषणत्वमितिटीकाकृतः नचुतस्य संबंधत्वे नीलोवटइत्यादौ व्याप्तिरितिवाच्यम् राहोः शिर इत्यादावौपाधिकभेदसंबन्धमादायप्रत्युपपादनपरस्पराने

कावस्थायुक्तरा हो रिदमेकावस्थायुक्तं शिरो वयवइत्याद्यं तवक्रत्यस्थभासस्य प्रामाण्येनाभेदस्य लक्षसंबंधयवनशीत्यर्थं लाभादभेदसंबंधे तदापादनासंभवात् ताद्रूप्याभावेणाभेदसंबन्धस्य प्राप्ति पदिकार्थविशेषणत्याऽविवक्षाबोधकाद्यास

वच्छसंबंधि भेदनियतत्वं तत्सिद्धमेव यदि भेदनियतत्वमेवेत्याद्युक्तदासर्वसाधारण्यात्संबंधिनावच्छेदकभेद एव नियामकत्वेनाभ्युपेयतां नच नत्संबन्धत्वे मानाभावः सर्वसिद्धनीलादिविशिष्टबुद्धेरेव मानत्वात् शाब्दबोधे तज्ज्ञाननिया

मकं च प्रकृतिप्रत्ययविशेषयोः समानाधिकरणपदयोश्च समभिव्याहाररूपाकांक्षादि अन्यस्वार्थवत्त्वे चभाक्षेपपदानां सामान्ये वर्त्तमानानां यद्विशेषे पर्यवसानं स वाक्यार्थ इत्युक्तम् यद्विशेषे पर्यवसानमित्यस्य च यस्य संबन्धे तोर्विशे

षे विशेष्यविशेषणभावरूपेऽस्यार्थः स वाक्यार्थः तस्य तु वाक्यजन्यबोधे आकांक्षादिनियम्यभानत्वमर्थः वाक्यशक्तिपक्षलाभिप्रायेण वाक्यार्थाभिधानम् प्रातिपदिकार्थस्य तु पदसामानाधिकरण्यादुपसंख्यानमधिकत्वादित्यत्र तु वीरः पुरुष इ

त्यादौ विशेष्यविशेषणभावप्रयोजकस्य प्रातिपदिकार्थातिरिक्ताभेदसंसर्गस्य विभानान्नातिपदिकार्थमात्राभावात्प्रथमानुपपत्तिः तत्र प्रथमायाउपसंख्यानमाह तु व्यामिन्यर्थात्तद्विशेषोपि केयटेनापि न वाक्यार्थत्वादितितत्रापत्याख्यानादप्र

रेवीरप्रातिपदिकारन्नेपक्षितशाब्दान्तरोक्तिविशेषणभावात्स्वार्थमात्रनिष्ठात्प्रथमाविधीयरूपस्य प्रतीतपदप्रयोगयोर्द्वितशद्वयुज्जाने नविशेष्यविशेषणभावातिरिक्तस्येव तन्नियामकत्वं धुन्वते वक्तुः तत्राभेदस्य तादात्म्यरूपस्य संबन्धतया चाभा

सनिरूपणे वक्ष्यमाणत्वयानोक्तविकल्पानामवसरः तस्माद्वीरपुरुषइत्यादौ विशेष्यविशेषणभावातिरिक्तः संबन्धो वश्यमभ्युपेयः विशेष्यविशेषणभावस्येव न संबन्धता विशेष्यविशेषणयोर्भावइति व्युत्पत्त्या तस्य विशेष्यत्वविशेषणत्वमात्रपर्य

वसायित्वया तयोरद्वित्वात् अनुयोगित्वप्रतियोगित्वाभ्यांहि इत्यो पपादनीयकत्वे वसस्यापन्नेद्वयोः समुदितयोः स्वस्वामिभाववत् शाब्दानुगममात्रस्यार्थापरिच्छेदकत्वात् तस्माद्यथा नामेवरमणीयमिति । ननु विभक्तीनां धर्मवाचकत्वमत

न्तरसिद्धं तयाकथं तत्र प्रकृत्यर्थस्याभेदेनान्वयो योग्यत्वादतआह । विभक्तीनामिति । कारकविभक्तीनामित्यर्थः । धर्मिवाचकत्वात । शक्तिमत्त्वकत्वादित्यर्थः शक्तिः कारकमितिपक्षे इत्यभिप्रायेणाह । धर्मवाचकत्वइति स्वत्वस्वरसभङ्गापत्तेरिति ;

तत्र स्वर्ग्यामाद्यैददानीत्यत्र नात्र स्वर्यः प्रार्थयते नानुमन्यते न निराकरोति प्रेरकंविप्राय गांददाति अनुमंतृरूपाध्यायायगांददातीति । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेदः संसर्गः विभक्तीनां धर्मिवाचकत्वात धर्मवाचकत्वेकर्मेति

द्वितीयेत्यादिस्वरसभङ्गापत्तेः कर्मार्थकत्वाद्वितादौ तथार्थानाच द्वितीयाद्यर्थकववृत्ती सौप्रभेदकरत्वादौ धर्मिवाचकत्वालाभाच सुपां कर्मादयोप्यर्थाः संख्या चैव तथा निरूमितिभाष्यात्चेति दिक् आश्रयस्यापि प्रकृतेवलाभा

न विभक्तिवाच्यतांकिं त्वाश्रयत्वमात्रं वाच्यम् तदेवतादात्म्येनावच्छेदकम् करणत्वतृतीयायाश्च व्यापारोपि पंचम्याविभागमात्रं चतुर्थ्यां उद्देश्यत्वमात्रम् अनएवात्तमधिकरणमपि नविरूध्यत इत्यभिप्रेत्याह । शक्तिरेववेति । षत्वमपीतिशे

तदुद्देश्यकर्मादिपदानां धर्मपरतया व्याख्यानेविनोक्तार्थालाभात् इङ्गापत्तेरित्व ... षः षष्ठीशेषइतिसूत्रात्तत्याः संवन्धमात्रं वाच्यम्

वोध्येत्यर्थः तथाचविभक्तीनां धर्मवाचकत्वेपि तत्र प्रकृत्यर्थस्य प्रवृत्तितयाऽन्वयेलक्षणाविरहिवेतनया नेडुलादीनामपि फलाश्रयत्वरूपकर्म तया भानात्र स्वरसभङ्गेयतआह । कर्मार्थकेति । कृतिपक्षकं तंडुलत्वादौ तद्धितेश योऽस्मत्त्वादौ आदि

पदाद्भिःपरिग्रहः तथाचतत्र योरेवत्यादिस्वरसः कर्मादिपदस्य धर्मिपरत्वेनापितत्यान्नस्वविशमितिभावः ननु तत्रपदार्थानां सामानाधिकरण्यानुपपत्त्या तु कर्मादिपदस्य धर्मिवाचकत्वमत्रत्काप्यभावेनधर्मवाचकत्वेनकिंचि

द्धाधकमतआह । द्वितीयाद्यर्थकेति । द्वितीयादिविभक्तीनां धर्मवाचकत्वेतदर्थविहितसमासस्यापिधर्मवाचकत्वापत्त्याप्रोद्कस्मादावुदककर्त्तृकप्राप्तिकर्मत्वस्य समानविभक्तिकपदेषु स्याप्रामाद्यावभेदान्वयानुपपत्तेरत्रा

पिजागरूकतया द्वितीयादिविधायकसूत्रस्थकर्मादिपदानां धर्मिवाचकत्वमावश्यकमितिभावः ननु तन्मते पि व्याः संबंधार्थकतया तत्स्थाविधिनवकृतीहे: परार्थानामसामानाधिकरण्यानुपपत्तेस्तुल्यत्वेन तत्र लक्षणा यावि शिष्टश

क्त्या वा सामानाधिकरण्योपपादन याऽ सत्रापि तथैव तरीत्यानिर्वाहे कृतं स्वपदधर्मिवाचकत्वेनेत्यत आह । स्वपां कर्मादयोप्यर्था इति । यदि कर्मत्वादिधर्मो द्वितीयाद्यर्थस्तथापिविवक्षितोभयनियमे तदा कर्मत्वादयोर्थाः स्युरेवायन्नाणाका

रोपि तदर्त्थं व्याप्त्तैतत्सम्मुनिदयविदो धात्द्वितीयायार्थत्वमप्रामाणिकमितिभावः शक्तिर्वाद्यत्तमवलंब्याह । आश्रयस्यापीति आश्रयत्वेनभानं नसिद्धमितिभावः । आश्रयत्वमात्रमिति । द्वितीयातृतीयासप्तमीनामितिशेषः मात्र

पदेनाश्रयरूपधर्मिवाच्यत्वव्यवच्छेदः नत्वाश्रयत्वस्याश्रयत्वेनाश्रयत्वेनशक्यतावच्छेदकं वाच्यम् तत्राश्रयेतरत्वइतिवेशतिसकलाश्रयवृत्तित्वे तथाचाश्रयादिवृत्ति तस्यतत्पदशक्यतावच्छेदकत्वेगौरवमतआह । तदेवेति । आ

श्रयत्वमेवेत्यर्थः एवकारेण निरुक्ताश्रयत्वत्वस्यावच्छेदः अवच्छेदकं वाच्यतावच्छेदकमित्यर्थः इदमुपलक्षणम् वक्ष्यमाणरीत्या वाच्यतासंबंधेनाश्रयत्वस्य हि वस्तुतस्तु नाश्रयत्वत्वमुक्तरूपं सर्वस्येव अमेयत्वाद्याश्रयत्वमप

आश्रयेतरत्वसिद्धेः किंत्वखण्डोपाधिरूपंतत्स्य शक्यतावच्छेदकत्वेचनकोपिदोषः इत्यवधेयम् कर्त्तृतृतीयायाद्याश्रयत्वस्य शार्थकत्वादाह । करणेति । व्यापारोपीत्यपि नाश्रयत्वसमुच्चयः वस्तुतोन तस्यापिशक्यतासंबंधवि

धयैवतज्ज्ञानसंभवादितिवोध्यम् । विभागमात्रमिति । मात्रपदेनाश्रयत्वव्यवच्छेदः विभागस्याश्रयत्तयान्वयादेव विभागाश्रयत्वस्यापादानत्वलाभादितिभावः एवमन्यत्रापि उद्देश्यत्वमात्रमित्यत्रेनतदाश्रयत्वस्य । अतएवेति । कृ

मित्वादिशक्तेस्तत्तद्विभक्तिवाच्यत्वादेवेत्यर्थः । नविरुध्यतइति । एतदाकृतिग्रन्थोरुभयोर्भावेपि जातिरेव वाच्या नाश्रयइति विशेषणत्वेतिव्यायादिशेषान्तानामिधागच्छेत्नीत्याशक्तिविशेषणत्वरतिस्यायाच्च व्यक्तिशक्तौ वासिवाचापदानेनाः

न्नुत्वादिद्वितत्वसिद्धान्ततया कारकविभक्त्यर्थनिरूपणप्रसंगात्तत्पष्ठ्यर्थं निरूपयति । संबंधइति । सचकारकप्रातिपदिकार्थभिन्नः स्वस्वामिभावादिः शेषेउक्तात्यशिष्टः हि धात्वा तत्रात्वाविभक्तीनामनभेदेन धर्मधर्मिवाचकत्वद

देतस्यास्वाधर्मोमाभूदित्याशयेनाह सारे । संवंधमात्रमिति । पदकृत्येपी नित्रेषः स च कश्चित्संबंधत्वेनसामान्यधर्मेणकश्चित्तद्विशेषरूपेण षष्ठीवाच्यः तत्रसामान्यरूपेणमानः स्वतीत्यादो विशेषरूपेणविवक्षायां स्व

स्वविशेषमप्यायथंतत्र द्विभक्तिसंभवात् राज्ञः पुरुषइत्यादौ विशेषरूपेण अनेकसंवन्धसत्त्वेपिसंवन्धविशेषविवक्षयानेदं चेत्रस्येतिप्रयोगात् संवन्धश्च सर्वत्रक्रियाकारकभावमूलकएव षष्ठीशेषइतिसूत्रभाष्यो २२

राज्ञः पुरुष इत्यत्र राजा पुरुषाय ददातीति संप्रयत्याद्राजा कर्त्री पुरुषः संप्रदानम् एतत्सर्वं शास्त्रेण तत्र शेषत्वेनैव विवक्षितो किंच प्रसिद्धा वृक्षः शाखा वा यायुधिकरणं यदेतत्स्वं नाम तत्तद्भिः प्रकारैरेतद्भवति रूपत्वात्परस्परेण शाखाया परिवर्तनेन तथा हि निमयादि स्वनेनय
शास्त्रीयमाणं क्रियात आपित्यफल संबन्धानुमितकरणत्वादि शङ्के वक्तव्यस्थित्या सम्बन्धादि सर्वथैकेन शेषपदार्थाप्रसिद्धिमाशङ्क्यैवं तत्र कर्मादीनामविवक्षा शेष इति भगवता क्रिया कारक संबंधस्य वस्तुतः सर्वत्र सत्त्वेपि तन्निमित्तस्य स्वस्वामिभावादेः सं
बंधत्वेन विवक्षायां तस्या विवक्षणं शेषपदार्थः सोऽत्यन्तमिति तद्भावः न च संबंधस्यैव भयनिरूपणत्वाद्भाव इत्यत्र राजपदेन तत्र निवहरूपपदेनान्वयः संबधापत्तिरिति वाच्यम् यदा तत्र एकारकत्वविवक्षा तदा राजपदादेव यदा तु पुरुषस्य तत्त्वविव
क्षा तदा पुरुषपदादपि पुरुषस्य राज्ञेति न चैकदेशे भयत्र सेतिना ना तिप्रसंगः तदुक्तं हरिणा । द्विष्ठोप्यसौ पदार्थता प्रतुल्येषु व्यतिरिच्यते तत्र शिष्टीयमानत्वप्रधानेष्वेव युज्यत इति परार्थत्वात् स्वरूपप्रतिपत्तौ विशेषणत्वात् विशेषणत्वेनैव दलितस्य स
वस्थं विना विशेषणता संभवेन तदाकांक्षितत्वात् संबन्धो व्यतिरिच्यते उद्भूततया प्रतीयते तत्रैव षष्ठी विशेष्यस्य तु पदान्तरेण समभिव्याहारे स्वरूपेणैव प्रतीयमानत्वात् विशेष्यता नियामकसंबन्धाकांक्षा तत्र विशेषणे । षष्ठ्या प्रतीयमानः प्रधा
नेषु विशिष्टेषु प्रयुज्यते तस्य द्विष्ठत्वस्वभावात्तत्र निरूपितविशेष्यतया राजादिपदसन्निधाने प्रतीयमानाया उपकारकोऽभवतीति तदर्थः षष्ठी शेष इति सूत्रभाष्ये कैयटोऽप्येवमेतत् । कारकत्वस्येति । कर्तृकर्मणोः कृतीत्यादि द्विविहितप
त्वाद्यर्थः शेषविहितत्वस्य संबन्धरूपधर्मवाचकतया षष्ठीत्वेनेत्यस्याप्युपितद्वाचकत्वस्य न्याय्यत्वादिति भावः नन्वेवं कर्तृकर्मादिकारकविहितत्वेऽपि षष्ठीविभक्तीनां कथं कर्तृत्वादिवाचकत्वमतः प्राह । सप्तमीपञ्चम्यौ चेति । तथा च ध
र्मवाचकत्वस्याविभावात्कारसंमतत्वेन तत्तास्तं तद्वाचकत्वे दोष इति भावः । दर्शनादिति । तत्र सिद्धत्वं कारकमिति तदेकत्वादित्यभ्युपगमादेव कारकस्य देशान्तरादौ देवदत्तस्य कर्तृकारकस्यैव तत्राप्यपदेशासंभवात् प्रायः पञ्चमी सप्तम्योरुपपाद
नाय प्रश्नस्य क्रियामध्य इति वक्तव्यमिति वार्तिकस्य उदाहरणानां शेषनां साधनं क्रियायाः प्रवृत्तिर्भवति क्रियामध्ये कारकमध्ये भवति तत्र कारकमध्ये इत्यादौ भिन्नविधित्वेन साधनमित्यस्य शक्तिरित्यर्थः तथा च देवदत्तादिरूपकर्तृ द्वा
रेऽपि कालमेवमिति भुजिक्रियानिमित्तकारकपदार्थकर्तृत्वस्याभेदात् तन्निमित्तमध्यावर्तेऽपि अवेशोलीति पञ्चम्युक्तेरुपपत्त्यभावात् क्रियामध्य इति वार्तिके नारंभणीयमिति तद्भावः इदमुपलक्षणम् अन्यत्रापि तत्र भाष्यस्य तत्रापि संख्या
विभक्त्यर्थतिपत्तेरेवमिति द्विताधिकारसमर्थो द्वयोः कारकयोरन्तरेत्वमिति तेविनाभावप्रसंगः कर्तृसाधनस्य इत्यत्र लोके किं कारणं तद्दिश्यते तामिति तमधिकरणमिति कृत्वा सप्तमी तत्रापि तीत्याह कालवा अन्तरेणमिथाना
त् अत्रसिद्धिरिति विधानमित्यादिना प्रसज्यप्रतिषेधपर्युदासेवान्नजर्थे रूपत्वं परिहृत्य यदि साधनं द्रव्यं स्यात् तदा तदेकमेव तत्त्वामिति तमिति प्रवर्तकपरिहारेण संभवत्स्यपशक्तिः साधने तदात स्याभेदादन्नमिति तत्संभवाद्वक्तव्यं तत्परिहार इत्यभि
प्रेत्य किं पुनर्द्रव्यं साधनमाहोस्विद्गुण इत्याशंक्य किं पुनः साधनं स्यात् गुण इत्याह कथं ज्ञायते एवं हि कश्चित् कंचित् पृच्छति क्व देवदत्त इति तत्स्थानं पाचके सोऽप्यदेवकृतिः कलरस्मिन्नास्ति तस्य तदधिकरणं भवत्वाचये नाभिसंबध्यमानः
कर्तृसंपद्यत इति द्रव्यसाधनेन यत्कर्मकर्मैव स्यात् कारणं करणमेव यदधिकरणं अधिकरणमेव ति कैयटेनापि यदि द्रव्यं साधनं स्यात् तदा तस्यैकरूपत्वान्न विवक्ष्यता वाधितमस्य मिता विषयत्वाच्चानार्थक्रियाकरणेनेदं धनेन हरेन जल

कारकत्वस्यालुशक्तिरेवेत्यर्थम् सप्तमीपञ्चम्यौ कारकमध्य इति सूत्रे शक्तिः कारकमिति पक्षस्य भाष्ये दर्शनात् एवं च देवदत्तस्य गोदोहमन्यत्र गेहे सन्नेन गंगायां मयारीयतः इत्यत्र देवदत्तसंवन्धि गवा भिन्नाश्रयकत्वागतानुरूप्लो ब्राह्म
णो हिंस्य कोगे रूवधिकविभाग जनकोऽह स्वकरणको गंगाधिकरणको मन्निष्ठो व्यापार इति बोध इत्यत्रकारेण अत्रमानस्पर्शायन दृष्टं ज्ञानातीनाद्वेहि द्वितीया विषयतायां लक्षणेतिवत्तुकल्पवदनोनेयापिका न्यायाह सपां कर्मेतीति
प्रबंधभावः सुपां कर्मोद्ययोष्यर्थाः संख्या चैव तथा तिङाम् प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु चेति वार्तिक तद्भाष्यभाकुर्मादेर्वाच्यताया स्त्रियमस्य लाभः तथाहि स्तोकनमस्कर्म लिङ्गि द्वितीया ह्येकयोर्द्विवचने कवचने लः कर्म
णि लस्पतित्रसङ्गिना सैकवचनद्विवचनादेरेकवाक्यतयाकर्मादेस्तत्संख्यायाश्च वाच्यता लभ्यते तथा तन्नियमस्य द्विविधोलभ्यते द्वितीया कर्मण्येव तृतीया करण एवेत्यादिरर्थ नियमः कर्मणि द्वितीयैव करणे तृतीयेवेत्यादि
श इति नियमस्य उभयथापि सिद्धनियमविरुद्धलक्षणादिकमसाधुत्वप्रयोजकमिति यासे कर्मणि नान्तर्तवदेहिति निषेधविषयो भवत्येवेति सिद्ध्यालक्षणपि विभक्त्यप्रयोजिकैव अतएव विभक्तौ न लक्षणेति नैयायिकहृदयानां च

माहरवदंकुरू वृदो लीति भेदद्वयदेशेन स्यात् इत्थं तेच नानाशक्तिभावाचागमः सिद्ध इति तद्धि हेतम् एवं च शक्तिकारकपक्षस्य भाष्यकैयटसंमतत्वेन कर्मत्वादेर्द्वितीयादिवाच्यत्वं वदं तां मतमनुपेक्षणीयमिति भावः प्रातिपदिकार्थेति सूत्रविहिता
यः प्रथमा या स्वसप्रकृत्यर्थ एवार्थः स च शब्दप्रवृत्तिनिमित्तं तदाश्रयश्च अतएव लिंगग्रहणं चारितार्थम् अन्यथा स्वमोर्नपुंसकादिति सूत्रप्रामाण्यात्तस्यापि प्रातिपदिकार्थतया तदुपादानं वैयर्थ्यात् अन्यथा घटत्वं च प्रवृत्तिनिमित्ताश्रयत्वप्रका
